वीर्यः शकुनिश्चापि सौवलः स्मयमानस्तु शनकैरश्वत्थामा महारथः तवपुत्राश्च कार्त्स्न्येन जुगुपुः शल्यमाहवे
भीमसेनं त्रिभिर्विध्वा कृतवर्मा शिलीमुखैः वाणवर्षेण महता क्रुद्धरूपमवारयत् धृष्टद्युम्नं ततः क्रुद्धो
बाणवर्षैरताडयत् द्रौपदेयांश्च शकुनिर्यमौ च द्रौणिरभ्ययात् दुर्योधनो युधांश्रेष्ठ आहवे केशवार्जुनौ
समभ्ययादुग्रतेजाः शरैश्चाभ्यहनद्बली एवं द्वंद्वशतान्यासंस्त्वदीयानां परैः सह घोररूपाणि चित्राणि त
त्रतत्र विशांपते ऋक्षवर्णान्जघानाश्वान्भोजो भीमस्य संयुगे सोवतीर्य रथोपस्थाद्धताश्वः पांडुनंदनः का
लदंडमिवोद्यम्य गदापाणिरयुध्यत प्रमुखे सहदेवस्य जघानाश्वांश्च मद्रराट् ततः शल्यस्य तनयं सहदेवोसि
नावधीत् गौतमः पुनराचार्यो धृष्टद्युम्नमयोधयत् असंभ्रांतमसंभ्रांतो यत्नवान्यत्नवत्तरं द्रौपदेयांस्त
थावीरानेकैकं दशभिः शरैः अविध्यदाचार्यसुतो नातिक्रुद्धः स्मयन्निव पुनश्च भीमसेनस्य जघानाश्वांस्त
थाहवे सोवतीर्य रथात्तूर्णं हताश्वः पांडुनंदनः कालदंडमिवोद्यम्य गदां क्रुद्धो महाबलः पोथयामास तुर
गान्रथं च कृतवर्मणः कृतवर्मा त्ववप्लुत्य रथात्तस्मादपाक्रमत् शल्योपि राजन्संक्रुद्धो निघ्नन्सोमकपांड
वान् पुनरेव शितैर्बाणैर्युधिष्ठिरमपीडयत् तस्य क्रुद्धो रणे भीमः संदष्टदशनच्छदः विनाशायाभिसंधाय
गदामादाय वीर्यवान् यमदंडप्रतीकाशां कालरात्रिमिवोद्यतां गजवाजिमनुष्याणां प्राणांतकरणीम
ति हेमपट्टपरिक्षिप्तामुल्कां प्रज्वलितामिव शैक्यां व्यालीमिवात्युग्रां वज्रकल्पामयोमयीं वंद

न ६

नागरूपंकाक्तांप्रमदामिवोक्षितामिव वसामेदोस्रदिग्धांगीं जिह्वांवैवस्वतीमिव पटुघंटारवशतां वासवीमशनीमिव
निर्मुक्ताशीविषाकारां पृक्तां गजमदैरपि त्रासनीं रिपुसैन्यानां स्वसैन्यपरिहर्षणीं मनुष्यलोकविख्यातां गिरि
श्रृंगविदारिणीं यथाकैलाशभवने महेश्वरसखवली आह्वयामास कौंतेयः संक्रुद्धमलकाधिपं यथामायाम
यान् क्रोधान्सुबहून्गंधमादने जघानगुह्यकान्क्रुद्धो नदन्पार्थो महाबलः पार्थ्यमाणोपिवहुभिर्द्रौपद्याः प्रिय
मास्थितः तांवज्रमणीरत्नाद्यामष्टाश्रिंवज्रगौरवां समुद्यम्य महाबाहुः शल्यमभ्यद्रवद्रणे गदयायुद्धकुश
लस्तथादारुणनादया पोथयामास शल्यस्य चतुरोश्वान्महाजवान् ततः शल्यो रणेक्रुद्धः पीनवक्षसितोमरं
निचखाननदन्वीरोवर्म्मभित्वास्यसोभ्ययात् वृकोदरस्त्वसंभ्रांतस्तमेवोद्धृत्यतोमरं यंतारं मद्रराजस्य नि
र्बिभेदततो हृदि साभिन्नवर्म्मारुधिरं वमन् वित्रस्तमानसः पपाताभिमुखोदीनो मद्रराजस्त्वपाक्रमत्
कृतप्रतिकृतं दृष्ट्वाशल्योविस्मितमानसं गदामाश्रित्य वीरात्मा प्रत्यमित्रमवेक्षत ततः सुमनसः पार्था
भीमसेनमपूजयन् तद्दृष्ट्वाकर्म्मसंग्रामे घोरमक्लिष्टकर्म्मणः महाभारते शल्यपर्वणि संजयउवा
च पतितंप्रेक्ष्ययंतारं शल्यः सर्वायसीं गदां आदायतरसाराजन् तस्थौगिरिरिवाचलः तंदीप्तमिव
कालाग्निंपाशहस्तमिवांतकं सश्रृंगमिवकैलाशं सवज्रमिववासवं सशूलमिवहर्यक्षंवनेमत्तमिव
द्विपंजवेनाभ्यपतद्भीमः प्रगृह्यमहतींगदां ततः शंखप्रणादश्च तूर्याणांचसहस्रशः सिंह

नादश्च संजज्ञे शूराणां हर्षवर्द्धनः प्रेक्षंतः सर्वतस्तौ हि योधा महाद्विपौ तावकाश्च परे चैव साधु साध्विति सृंजय
न हि मद्राधिपादन्यो रामाद्वा यदुनंदनात् सोढुमुत्सहते वेगं भीमसेनस्य संयुगे तथा मद्राधिपस्यापि गदावे
गं महात्मनः सोढुमुत्सहते नान्यो योधो युधि वृकोदरात् तौ वृषाविव नर्दंतौ मंडलानि विचेरतुः आवल्गितौ ग
दाहस्तौ मद्रराजवृकोदरौ मंडलावर्त्तमार्गेषु गदाविहरणेषु च निर्विशेषमभूद्युद्धं तयोः पुरुषसिंहयोः तप्तहेम
मयैः शुभ्रैः बभूव भयवर्द्धनी अग्निज्वालैरिवाविद्धा पट्टैः शल्यस्य सा गदा तथैव चरतो मार्गान्मंडलेषु महा
त्मनः विद्युदभ्रप्रतीकाशा भीमस्य शुशुभे गदा ताडिता मद्रराजेन भीमस्य गदया गदा दह्यमानेव वै राज
न्ससृजे पावकार्चिषः तथा भीमेन शल्यस्य ताडिता गदया गदा अंगारवर्षं मुमुचे तदद्भुतमिवाभवत् दंतै
रिव महानागौ शृंगैरिव महर्षभौ तोत्रैरिव तदान्योन्यं गदाग्राभ्यां निजघ्नतुः तौ गदानिहतैर्गात्रैः क्षणेन रु
धिरोक्षितौ प्रेक्षणीयतरावास्तां पुष्पिताविव किंशुकौ गदया मद्रराजेन सव्यदक्षिणमाहतः भीमसेनो
महाबाहुर्न चचालाचलो यथा तथा भीमगदावेगैस्ताड्यमानो मुहुर्मुहुः शल्यो न विव्यथे राजन्दंतिनेवा
हतो गिरिः शुश्रुवे दिक्षु सर्वासु तयोः पुरुषसिंहयोः गदानिपातसंह्रादो वज्रयोरिव निस्वनः निवृत्तौ
तु महावीर्यौ समुच्छ्रितगदावुभौ पुनरंतरमार्गस्थौ मंडलानि विचेरतुः अथाभ्येत्य पदान्यष्टौ संनिपातोऽभवत्त

श०

१५

योः उद्यम्यतौ हृष्टौ साम्यामतिमानुषकर्मणोः पार्थयामौ तदान्योन्यं मंडलानि विचेरतुः क्रियाविशेषं कृतिनौ दर्शयामा
सतुस्तदा अथोद्यम्य गदे घोरे सशृंगाविव पर्वतौ तावाजघ्नतुरन्योन्यं यथा भूमिचलेचलौ तौ परस्परवेगाच्च गदा
भ्यां च भृशविक्षतौ युगपत्पेततुर्वीरावुभाविंद्रध्वजाविव उभयोः सेनयोर्वीरास्तदा हाहाकृतामवन् भृशं मर्मण्य
भिहतावुभावास्तां सुविह्वलौ ततः स्वरथमारोप्य मद्राणामृषभं प्रति अपोवाह कृपः शल्यं तूर्णमायोध
नादथ क्षीववद्विह्वलत्वात्तु निमेषात्पुनरुत्थितः भीमसेनो गदापाणिः समाह्वयत मद्रपं ततस्तु तावकाः
शूरा नानाशस्त्रसमायुताः नानावादित्रशब्देन पांडुसेनामयोधयन् भुजावुच्छ्रित्य शस्त्रं च शब्देन महता ततः
अभ्यद्रवन्महाराज दुर्योधनपुरोगमाः तदनीकमभिप्रेक्ष्य ततस्ते पांडुनंदनाः प्रययुः सिंहनादेन दुर्योधनपु
रोगमान् तेषामापततां तूर्णं पुत्रस्ते भरतर्षभ प्रासेन चेकितानं वै विव्याध हृदये भृशं स पपात रथोपस्थे
तव पुत्रेण ताडितः रुधिरौघपरिक्लिन्नः प्रविश्य विपुलं तमः चेकितानं हतं दृष्ट्वा पांडवानां महारथाः
असक्तमभ्यवर्षंत शरवर्षाणि भागशः तावकानामनीकेषु पांडवा जितकाशिनः व्यचरंत महाराज प्रे
क्षणीयाः समंततः कृपश्च कृतवर्मा च सौबलश्च महाबलः अयोधयन् धर्मराजं मद्रराजपुरस्कृताः
भारद्वाजस्य हंतारं भूरिवीर्यपराक्रमं दुर्योधनो महाराज धृष्टद्युम्नमयोधयत् त्रिसाहस्रा रथा राजन्
तव पुत्रेण चोदिताः अयोधयंत विजयं द्रोणपुत्रपुरस्कृताः विजये धृतसंकल्पाः समरे त्यक्तजीवि

श्री ए०

२०

ताः प्राविशंस्तावकाराजन्हंसाइवमहत्सरः ततोयुद्धमभूद्घोरंपरस्परवधैषिणां अन्योन्यवधसंयुक्तम
न्योन्यप्रीतिवर्द्धनं तस्मिन्प्रवृत्तेसंग्रामेराजन्वीरवरक्षये अनिलेनेरितंघोरमुत्तस्थौपार्थिवंरजः श्रव
णान्नामधेयानांपांडवानांचकीर्त्तनात् परस्परंनजानीमोयदयुध्यंतभीतवत् तद्रजःपुरुषव्याघ्रशोणितेन
प्रशमितं दिशश्चविमलाजग्मुस्तस्मिंस्तमसिशामिते तथाप्रवृत्तेसंग्रामेयुद्धेघोरेभयावहे तावकानांपरे
षांचनासीत्कश्चित्पराङ्मुखः ब्रह्मलोकपराभूत्वाप्रार्थयंतोजयंयुधि सुयुद्धेनपराक्रांतानराःस्वर्गमभीप्स
वः भर्त्तृपिंडविमोक्षार्थंभर्त्तृकार्येविनिश्चिताः स्वर्गसंसक्तमनसोयोधायुयुधिरेतदा नानारूपाणिश
स्त्राणिविसृजंतोमहारथाः अन्योन्यमभिगर्जंतः प्रहरंतःपरस्परं हतविध्यतगृह्णीतप्रहरध्वंनिकृं
तत इतिवाचःस्मश्रूयंतेतवतेषांचवैबले ततःशल्योमहाराजधर्मराजंयुधिष्ठिरं विव्याधनिशितैर्बा
णैर्हंतुकामोमहारथं तस्यपार्थोमहाराजनाराचान्वैचतुर्दश मर्माण्युद्दिश्यमर्मज्ञोनिचखानहस
न्निव आवार्यपांडवंबाणैर्हंतुकामोमहायशाः। विव्याधसमरेक्रुद्धोबहुभिःकंकपत्रिभिः अथ
भूयोमहाराजशरेणानतपर्वणा युधिष्ठिरंसमाजघ्नेसर्वसैन्यस्यपश्यतः धर्मराजोपिसंक्रुद्धोमद्ररा
जंमहायशाः विव्याधनिशितैर्बाणैःकंकबर्हिणवाजितैः चंद्रसेनंचसप्तत्यासूतंचनवभिःशरैः

श॰

१६

दुमसेनंचतुःषष्ट्यानिजघानमहारथः चक्ररक्षौहतौशल्यःपांडवेनमहात्मना निजघानततोराजंश्छेदीन्वैपं
चविंशतिं सात्यकिंपंचविंशत्याभीमसेनंचसप्तभिः माद्रीपुत्रौशतेनाजौविव्याधनिशितैःशरैः एवंविच
रतस्तस्यसंग्रामेराजन्सन्नतपर्वभिः प्रैषयच्छितान्पार्थःशराणांशीविषोपमान ध्वजाग्रंचास्यसमरेकुंतीपुत्रोयुधि
ष्ठिरः प्रमुखेवर्त्तमानस्यभल्लेनापाहरद्रथात पांडुपुत्रेणवैतस्यकेतुंछिन्नंमहाहवे निपतंतमपश्याम
मगिरिशृंगमिवाद्भुतं ध्वजंनिपतितंदृष्ट्वापांडवंचव्यवस्थितं संक्रुद्धोमद्रराजोभूच्छरवर्षंमुमोचह श
ल्यःसायकवर्षेणपर्जन्यइववृष्टिमान अभ्यवर्षदमेयात्माक्षत्रियानक्षत्रियर्षभः सात्यकिंभीम
सेनंचमाद्रीपुत्रौचपांडवौ एकैकंपंचभिर्विद्ध्वायुधिष्ठिरमपीडयत ततोबाणमयंजालंविततंपांडवोर
सि अथापश्यंमहाराजमेघजालमिवोद्गतं तस्यक्रुद्धोरणेशल्योबाणैःसन्नतपर्वभिः दिशःप्रच्छादया
मासप्रदिशश्चमहारथः ततोयुधिष्ठिरोराजाबाणजालेनपीडितः बभूवहृतविक्रांतोजंभोवृत्रहणा
यथा महाभारतेशल्यपर्वणि संजयउवाच पीडितेधर्मराजेतुमद्रराजेनमारिष सात्यकिर्भीमसेन
श्चमाद्रीपुत्रौचपांडवौ परिवार्यरथैःशल्यंपीडयामासुराहवे तमेकंबहुभिर्दृष्ट्वापीड्यमानंमहारथैः साधु
वादोमहान्जज्ञेसिद्धाश्चासन्प्रहर्षिताः आश्चर्यमित्यभाषंतमुनयश्चापिसंगताः भीमसेनोरणेशल्यंशल्यभूतंपराक्रमे

श्रीराम॰

११

एकेन विद्ध्वा वाणेन पुनर्विव्याध सप्तभिः सात्यकिश्च शतेनैव धर्मपुत्रपरीप्सया मद्रेश्वरमपाकीर्य्य सिंहनादमथान
दत् नकुलः पंचभिश्चैनं सहदेवश्च सप्तभिः विध्वा तं तु ततस्तूर्णं पुनर्विव्याध पंचभिः स तु शूरो रणोपेतः पीडि
तस्तैर्महारथैः विकृष्य कार्मुकं घोरं वेगघ्नं भारसाधनं सात्यकिं पंचविंशत्या शल्यो विव्याध मारिष भीमसे
नं त्रिसप्तत्या नकुलं सप्तभिस्तथा ततः सविशिखं चापं सहदेवस्य धन्विनः छित्वा भल्लेन समरे विव्याधैनं त्रि
सप्तभिः सहदेवस्तु समरे मातुलं भूरितेजसं सज्यमन्यद्धनुः कृत्वा पंचभिः समताडयत् शरैराशीविषाकारै
र्ज्वलज्ज्वलनसंनिभैः सारथिं चास्य समरे शरेणानतपर्वणा विव्याध भृशसंक्रुद्धस्तं च भूयस्त्रिभिः शरैः भीम
सेनस्तु सप्तत्या सात्यकिर्नवभिः शरैः धर्मराजस्तथा षष्ट्या गात्रे शल्यं समर्प्पयत् ततः शल्यो महाराज
निर्विद्धस्तैर्महारथैः सुस्राव रुधिरं गात्रात् गैरिकं पर्वतो यथा तांश्च सर्वान्महेष्वासान् पंचभिः पंचभिः शरैः
विव्याध तरसा राजंस्तदद्भुतमिवाभवत् ततोपरेण भल्लेन धर्मपुत्रस्य मारिष धनुश्चिच्छेद समरे सज्यं स सु
महारथः अथान्यद्धनुरादाय धर्मपुत्रो महारथः साश्वसूतध्वजरथं शल्यं प्राच्छादयच्छरैः स च्छाद्यमानः
समरे धर्मपुत्रस्य सायकैः युधिष्ठिरमथाविध्यद्दशभिर्निशितैः शरैः सात्यकिस्तु ततः क्रुद्धो धर्मपुत्रे श
रार्दिते मद्राणामधिपं शूरं शरौघैः समवारयत् स सात्यकेः प्रचिच्छेद क्षुरप्रेण महद्धनुः भीमसे

नकु २५

श० ९ ८

नमुखांस्तांस्त्रिभिस्त्रिभिरताडयत् तस्य क्रुद्धो महाराज सात्यकिः सत्यविक्रमः तोमरं प्रेषयामास स्वर्णदंडं महाधनं
भीमसेनोथ नाराचं ज्वलंतमिव पन्नगं नकुलः समरे शक्तिं सहदेवो गदां शुभां धर्मराजः शतघ्नीं तु जिघांसुः शल्यमाहवे
तानापतत एवाशु पंचानां वै भुजच्युतान् सात्यकिप्रहितं शल्यो भल्लैश्चिच्छेद मारिष भीमेन प्रहितं चापि शरं कनक
भूषणं द्विधा चिच्छेद समरे कृतहस्तः प्रतापवान् नकुलप्रेषितां शक्तिं हेमदंडां भयावहां गदां च सहदेवेन शरौघैः
समवारयत् शराभ्यां च शतघ्नीं तां राज्ञश्चिच्छेद भारत पश्यतां पांडुपुत्राणां सिंहनादं ननाद च नामृष्यत्तं तु शैने
यः शत्रोर्विजयमाहवे अथान्यद्धनुरादाय सात्यकिः क्रोधमूर्छितः द्वाभ्यां मद्रेश्वरं विध्वा सारथिं च त्रि
भिः शरैः ततः शल्यो महाराज सर्वांस्तांस्त्रिशितैः शरैः विव्याध सुभृशं क्रुद्धस्तोत्त्रैरिव महाद्विपान् ते वार्यमा
णाः समरे मद्रराज्ञा महारथाः न शेकुः प्रमुखे स्थातुं तस्य शत्रुनिषूदनाः ततो दुर्योधनो राजा दृष्ट्वा शैल्य
स्य विक्रमं निहतान्पांडवान्मेने पंचालानथ संजयान् ततो राजन्महाबाहुर्भीमसेनः प्रतापवान् संत्यज्य
मनसा प्राणान्मद्राधिपमयोधयत् नकुलः सहदेवश्च सात्यकिश्च महाबलः परिवार्य तदा शल्यं समंता
द्व्याकिरंछरैः स चतुर्भिर्महेष्वासैः पांडवानां महारथैः वृतस्तान्योधयामास मद्रराजः प्रतापवान् तस्य ध
र्मसुतो राजन् क्षुरप्रेण महाहवे चक्ररक्षं जघानाशु मद्रराजस्य पार्थिव तस्मिंस्तु निहते शूरे चक्ररक्षे महार

श्रीराम०
२२

थे मद्रराजोतिवलवान्सैनिकांस्त्वकिरंछरैः समाछन्नस्ततस्तांस्तुराजन्वीक्ष्यससैनिकान् चिंतयामाससमरेधर्मराजो
युधिष्ठिरः कथंनूनंभवेत्सत्यंतन्माधववचोमहत् नहिक्रुद्धोरणेराजाक्षपयेत्बलंमम ततःसरथनागाश्वाः पां
डवाः पांडुपूर्वज मद्रराजंसमासेदुः पीडयंतःसमंततः नानाशस्त्रौघबहुलांशरवृष्टिंसमुच्छ्रितां व्यधमत्समरे
राजामहाभ्राणीवमारुतः ततःकनकपुंखानांशल्यक्षिप्तांवियद्गतां शरवृष्टिमपश्यामः शलभानामिवायतीं
तेशरामद्रराजेनप्रेषितारणमूर्द्धनि संपतंतःस्मदृश्यंतेशकुनानांव्रजाइव मद्रराजधनुर्मुक्तैः शरैः कनकभू
षणैः निरंतरमिवाकाशंसंबभूवजनाधिप नपांडवानांनास्माकंतत्रकंचिद्व्यदृश्यत बाणांधकारेमहति कृते
तत्रमहाहवे मद्रराजेनबलिनालाघवाच्छरवृष्टिभिः लोड्यमानंतथादृष्ट्वापांडवानांबलार्णवं विस्मयंपरमं
जग्मुर्देवगंधर्वदानवाः सतुतान्सर्वतोयत्ताछरैः संपीड्यमारिष धर्मराजमवछाद्यसिंहइवव्यनदन्मुहुः तेछ
न्नाः समरेतेनपांडवानांमहारथाः नशेकुस्तेतदायुद्धे प्रत्युद्यातुंमहारथं धर्मराजपुरोगास्तु भीमसेनमुखा
स्तथा नजग्मुःसमरेशूरंशल्यमाहवशोभिनं महाभारतेशल्यपर्वणि॥ ॥संजयउवाच अर्जुनोद्रौ
णिमाकिद्धोयुद्धेवृद्धिमेरायसैः तस्यचापिशरैः शूरैस्त्रैगर्तानांमहारथैः द्रोणिंविव्याधसमरेत्रिभिरे
वशिलीमुखैः तथेतरानमहेष्वासान्द्वाभ्यांद्वाभ्यांधनंजयः भूयश्चैवमहाबाहुःशरवर्षैरवाकिरत्

द्रो०
[illegible]
१८

शरकंटकितास्तेतु तावका भरतर्षभ नजहुः समरे पार्थं वध्यमाना शितैः शरैः तेऽर्जुनं शरवर्षेण द्रोणपुत्रपुरोगमाः अयो
धयंत समरे परिवार्य महारथं तैस्त्वाक्षिप्ताः शरा राजन् कार्तस्वरविभूषिताः अर्जुनस्य रथोपस्थं पूरयामासुरंजसा तथा
कृष्णौ महेष्वासौ वृषभौ सर्वधन्विनां शरैर्वीक्ष्य वितुन्नांगौ प्रहृष्टौ युद्धदुर्मदाः कूबरं रथचक्राणि ईषां योक्त्राणि वा वि
भो युगं चैवानुकर्षं च शरभूतमभूत्तदा नैतादृशं दृष्टपूर्वं राजन्नैवापि च श्रुतं यादृशं तत्र पार्थस्य तावकाः संप्रचक्रिरे
सरथः सर्वतो भाति चित्रपुंखैः शितैः शरैः उल्काशतैः संप्रदीप्तं विमानमिव भूतले ततोऽर्जुनो महाराज शरैः संनत
पर्वभिः अवाकिरत्तां पृतनां मेघो वृष्ट्या यथाचलं तेवध्यमानाः समरे पार्थेनानांकितैः शरैः पार्थभूतममन्यंत प्रे
क्ष्यमाणास्तथाविधं ततोऽद्भुतशरज्वालो धनुःशब्दानिलो महान् सैन्येंधनं ददाहाशु तावकं पार्थपावकः चक्राणां
पततां चापि युगानां च धरातले तूणीराणां पताकानां ध्वजानां च रथैः सह ईषाणामनुकर्षाणां त्रिवेणूनां च भार
त अक्षाणामथ योक्त्राणां प्रतोदानां च सर्वशः शिरसां पततां चैव कुंडलोष्णीषधारिणां भुजानां च महाराज जं
घानां च सहस्रशः छत्राणां व्यजनैः सार्द्धं मुकुटानां च राशयः समदृश्यंत पार्थस्य रथमार्गेषु भारत ततः क्रुद्धस्य
पार्थस्य [illegible] रथमार्गे विशांपते अगम्यरूपा पृथिवी मांसशोणितकर्दमा बभूव भरतश्रेष्ठ रुद्रस्याक्रीडनं यथा
भीरूणां त्रासजननी शूराणां हर्षवर्द्धनी हत्वा तु समरे पार्थः सहस्रे द्वे समंततः रथानां सवरूथानां विधूमोग्निरिवज्व

श्रीराम०

तत्र यथा हि भगवानग्निर्युगांते दग्ध्वा चराचरं विधूमो दृश्यते राजंस्तथा पार्थो महाबलः द्रौणिस्तु समरे दृष्ट्वा पांडवस्य पराक्र
मं रथेनातिपताकेन पांडवं प्रत्यवारयत् तावुभौ पुरुषव्याघ्रौ श्वेताश्वौ रथिनां वरौ समीयतुस्तदा हंतुं परस्परवधैषि
णौ तयोरासीन्महाराज बाणवर्षं सुदारुणं जीमूतानां यथा वृष्टिस्तपांते भरतर्षभ अन्योन्यस्पर्द्धिनौ तौ तु शरैः स
न्नतपर्वभिः ततक्षतुर्मेधेन्यो मृशं शृंगाभ्यां वृषभाविव तयोर्युद्धं महाराज चिरं सममिवाभवत् ॥ अस्त्राणां संगम
श्चैव घोरस्तत्राभवत्पुनः ततोर्जुनं द्वादशभी रुक्मपुंखैः सुतेजनैः वासुदेवं च दशभिर्द्रौणिर्विव्याध भारत ततः प्र
हस्य बीभत्सुर्व्याक्षिपद्गांडिवं धनुः मानयित्वा मुहूर्तं च गुरुपुत्रं महाहवे व्यश्वसूतरथं चक्रे सव्यसाची महारथः
मृदुपूर्वं ततश्चैनं त्रिभिर्विव्याध सायकैः हताश्वे तु रथे तिष्ठन् द्रोणपुत्रस्तदायसं मुशलं पांडुपुत्राय चि
क्षेप परिघोपमं तमापतंतं सहसा हेमपट्टविभूषितं चिच्छेद सप्तधा वीरः पार्थः शत्रुनिबर्हणः स छिन्नं मुश
लं दृष्ट्वा द्रौणिः परमकोपनः आददे परिघं घोरं नगेंद्रशिखरोपमं चिक्षेप चैव पार्थाय द्रौणिर्युद्धविशार
दः तमंतकमिव क्रुद्धं परिघं प्रेक्ष्य पांडवः अर्जुनस्त्वरितो जघ्ने पंचभिः सायकोत्तमैः स छिन्नः पतितो भू
मौ पार्थबाणैर्महाहवे दारयन् पृथिवीन्द्राणां मनः शीघ्रं च भारत ततोपरैस्त्रिभिर्बाणैर्द्रौणिं विव्याध पांडवः
सोतिविद्धो बलवता पार्थेन सुमहाबलः न संभ्रांतस्तदा द्रौणिः पौरुषे स्वे व्यवस्थितः सुरथं तु ततो राजन्भारद्वा

श०

१८

जोमहारथः अवाकिरच्छरव्रातैःसर्वक्षत्रस्यपश्यतः ततस्तुसुरथोत्याजौपांचालानांमहारथः रथेनमेघघोषे
णद्रौणिमेवाभ्यधावत विकर्षन्वैधनुःश्रेष्ठंसर्वभारसहंदृढं ज्वलनाशीविषनिभैःशरैश्चैनमवाकिरत् सुर
थंवीक्ष्यसंक्रुद्धमापतंतंमहारथं चुक्रोधसमरेद्रौणिर्दंडाहतइवोरगः त्रिशिखांभ्रुकुटींकृत्वासृक्किणीपरि
संलिहन् उद्वीक्ष्यसुरथंरोषाद्धनुर्ज्यामपमृज्यच मुमोचतीक्ष्णंनाराचंयमदंडसमद्युतिं सतस्यहृदयं
भित्वाप्रविवेशातिवेगितः शक्राशनिरिवोत्सृष्टाविदार्यधरणीतलं ततःसपतितोभूमौनाराचेनसमाहतः
वज्रेणेवयथाश्रृंगंपर्वतस्यनिपातितं तस्मिंस्तुनिहतेवीरेद्रोणपुत्रःप्रतापवान् आरुरोहरथंतूर्णंतमे
वरथिनांवरः ततःसज्जोमहाराजद्रौणिराहवदुर्मदः अर्जुनंयोधयामाससंशप्तकवृतोरणे तत्रयुद्धं
महच्चासीदेकस्यबहुभिःसह मध्यंदिनगतेसूर्येयमराष्ट्रविवर्द्धनं तत्राश्चर्यमपश्यामदृष्ट्वातेषांपरा
क्रमं यदेकोयुगपद्वीरान्समयोधयदर्जुन विमर्दस्तुमहानासीदर्जुनस्यपरैःसह शतक्रतोर्यथापू
र्वंमहत्यादैत्यसेनया महाभारतेशल्यपर्वणि॥ ॥संजयउवाच॥ ॥दुर्योधनोमहाराजधृष्टद्युम्नश्चपा
र्षतः चक्रतुःसुमहद्युद्धंशरशक्तिसमाकुलं तयोरासन्महाराजशरधाराःसहस्रशः अंबुदानांयथाकालेज
लधाराःसमंततः॥ ॥राजातुपार्षतंविध्वाशरैःपंचभिरायसैः द्रोणहंतारमुग्रेषुपुनर्विव्याधसप्तभिः
धृष्टद्युम्नस्तुसमरेबलवान्दृढविक्रमः सप्तत्याविशिखानांवैदुर्योधनमपीडयत् पीडितंप्रेक्ष्यराजानंसोदर्यामर

श्रीराम०

२८

नर्षभ महत्या सेनया सार्द्धं परिववुः समपार्थितं स तैः परिवृतः शूरः सर्वतो विरथैर्भृशं व्यवरत्त समरे राजन्दर्शयन्नस्त्र
लाघवं शिखंडी कृतवर्म्माणं गौतमं च महारथं प्रभद्रकैः समायुक्तो योधयामास धन्विनौ तत्रापि सुमहद्युद्धं
घोररूपं विशांपते प्राणान्संत्यजतां युद्धे प्राणद्यूताभिदेवने शल्यस्तु शरवर्षाणि विमुंचन्सर्वतो दिशं पांडवा
न्पीडयामास ससात्यकिवृकोदरान् त[illegible]यमौ च [illegible]यमौ युद्धे यमतुल्यपराक्रमौ योधयामास
समरे धैर्येण च महाबलौ शल्यसायकसायकनुन्नानां पांडवानां महामृधे त्रातारं नाध्यगच्छंत केचित्तत्र महा
रथाः ततस्तु नकुलः शूरो धर्मराजे प्रपीडिते अभिदुद्राव वेगेन मातुलं माद्रिनंदनः आच्छाद्य समरे श
ल्यं नकुलः परवीरहा विव्याध चैनं दशभिः स्मयमानः स्तनांतरे सर्वपारशवैर्वाणैः कर्मारपरिमार्जिते
ः स्वर्णपुंखैः शिलाधौतैर्धनुर्यंत्रप्रचोदितैः शल्यस्तु पीडितस्तेन स्वस्रीयेण महात्मना नकुलं पीडयामा
स सपत्रिर्नतपत्रिभिः ततो युधिष्ठिरो राजा भीमसेनोथ सात्यकिः सहदेवश्च माद्रेयो मद्रराजमुपाद्रवत्
तानापतत एवाशु पूरयाणान्रथस्वनैः दिशश्च प्रदिशश्चैव कंपयानांश्च मेदिनी अभिजग्राह समरे सेनापतिर
मित्रजित् युधिष्ठिरं त्रिभिर्विध्वा भीमसेनं च सप्तभिः सात्यकिं च शतेनाजौ सहदेवं त्रिभिः शरैः ततस्तु स
शरं चापं नकुलस्य महात्मनः मद्रेश्वरः क्षुरप्रेण तदा चिच्छेद मारिष तदशीर्यत विच्छिन्नं धनुः शल्यस्य सा
यकैः अथान्यद्धनुरादाय माद्रीपुत्रो महारथः मद्रराजरथं तूर्णं पूरयामास पत्रिभिः युधिष्ठिरस्तु म

८

१०
द्रौणिंसहदेवस्तुमारिष दशभिर्दशभिश्चैनौसरस्येनसमविध्यतां भीमसेनस्तुतंषष्ट्यासात्यकिर्नवभिः शरैः मद्रराजम
भिद्रुत्यजघ्नतुः कंकपत्रिभिः मद्रराजस्ततः क्रुद्धः सात्यकिंनवभिःशरैः विव्याधभूयः सप्तत्याशराणांनतपर्वणां अ
थास्यसशरंचापंमुष्टौचिच्छेदमारिष हयांश्चचतुरः संख्येप्रेषयामासमृत्यवे विरथंसात्यकिंकृत्वामद्रराजोमहा
२०
बलः विशिखानांशतेनैनमाजघानमहाबलः माद्रीपुत्रौतुसंरब्धौभीमसेनंचपांडवं युधिष्ठिरंचकौरव्यविव्याधदश
भिःशरैः तत्राद्भुतमपश्याममद्रराजस्यपौरुषं यदेनंसहिताःपार्थानाभ्यवर्तंतसंयुगे अथान्यंरथमास्थायसा
त्यकिःसत्यविक्रमः पीडितान्पांडवान्दृष्ट्वामद्रराजवशंगतान् अभिदुद्राववेगेनमद्राणामधिपंबली आप
स्य४१
तंतंरथंतस्यशल्यःसमितिशोभनः प्रत्युद्ययौरथेनैवमत्तोमत्त मिवद्विपं ससन्निपातस्तुमुलोबभूवाद्भुतद
र्शनः सात्यकेश्चैवशूरस्यमद्राणामधिपस्यच यादृशोवैपुरावृत्तः शंबरामरराजयोः सात्यकिःप्रेक्ष्यसमरेमद्रराज
मवस्थितं विव्याधदशभिर्बाणैस्तिष्ठतिष्ठेतिचाब्रवीत् मद्रराजस्तुसुभृशंविद्धस्तेनमहात्मना सात्यकिंप्रति
विव्याधचित्रपुंखैःशितैःशरैः ततःपार्थामहेष्वासाःसात्वताभिसृतंनृपं अभ्यद्रवन्रथैस्तूर्णंमातुलंवधका
म्यया ततआसीत्परामर्दस्तुमुलःशोणितोदकः शूराणांयुध्यमानानांसिंहानामिवनर्दतां तेषामासीन्महा
राजव्यतिक्षेपःपरस्परं सिंहानामामिषेप्सूनांकूजतामिवसंयुगे तेषांबाणसहस्रौघैराकीर्णावसुधाभव श्रीराम०

त अंतरिक्षंचसहसाबाणभूतमभूत्तदा शरांधकारंबहुधाकृतंतत्रसमंततः अभ्रछायेवसंजज्ञेशरैर्मुक्तैर्महात्मभि
: तत्रराजछरैर्मुक्तैर्निर्मुक्तैरिवपन्नगैः स्वर्णपुंखैःप्रकाशद्भिःव्यरोचंतदिशस्तथा तत्राद्भुतंपरंचक्रेशल्यःशत्रुनि
बर्हणः यदेकःसमरेशूरोयोधयामासवैबहून मद्रराजभुजोत्सृष्टैःकंकबर्हिणवाजितैः संपतद्भिःशरैर्घोरैरव
कीर्यतमेदिनी तत्रशल्यरथंराजनविचरंतंमहाहवे अपश्यामयथापूर्वंशक्रस्यासुरसंक्षये महाभारतेशल्यपर्व
णि संजयउवाच ततःसैन्यास्तवविभोमद्रराजपुरस्कृताः पुनरभ्यद्रवन्पार्थान्वेगेनमहतारणे पीडितास्ता
वकाःसर्वेप्रधावंतोरणोत्कटाः क्षणेनैवचपार्थांस्तेबहुत्वात्समलोडयन् तेवध्यमानाःकुरुभिःपांडवानावतस्थिरे
निवार्यमाणाभीमेनपश्यतोःकृष्णपार्थयोः ततोधनंजयःक्रुद्धःकृपंसहपदानुगैः अवाकिरच्छरौघेणकृतव
र्माणमेवच शकुनिंसहदेवस्तुसहसैन्यंसमवारयत् नकुलःपार्श्वतःस्थित्वामद्रराजमवैक्षत द्रौपदेयान
रेंद्रांश्चभूयिष्ठंसमवारयन् द्रोणपुत्रंचपांचाल्यःशिखंडीसमवारयत् भीमसेनस्तुराजानंगदापाणिरवारय
त शल्यंतुसहसैन्येनकुंतीपुत्रोयुधिष्ठिरः ततःसमभवद्युद्धंसंसक्तंतत्रतत्रह तावकानांपरेषांचसंग्रामेष्वनि
वर्तिनां तत्रपश्यामहेकर्मशल्यस्यातिमहद्रणे यदेकःसर्वसैन्यानिपांडवानामयोधयत् व्यदृश्यततदाश
ल्योयुधिष्ठिरसमीपतः रणेचंद्रमसोभ्याशेशनैश्चरइवग्रहः पीडयित्वातुराजानंशरैराशीविषोपमैः अभ्यधा

श्रा १

श०

२१

वसुनर्मीमं शरवर्षैरवाकिरत् तस्यत[illegible]धवं दृष्ट्वा तथैव च कृतात्मसुतां अपूजयन्नमीकानिपरेषां तावकानिच पीड्यमा
नास्तु शल्येन पांडवा भृशविक्षताः शाद्रवंतरणे हित्वा क्रोशमाने युधिष्ठिरे वध्यमाने चमूनीकेषु मद्रराजेन पांडवः
अमर्षवशमापन्नो धर्मराजो युधिष्ठिरः ततः पौरुषमास्थाय मद्रराजमपीडयत् जयो वास्तु वधो वेति कृतबुद्धिर्महा
रथः समाहूयाब्रवीत्सर्वान्भ्रातॄन्कृष्णं च माधवं भीष्मो द्रोणश्च कर्णश्च ये चान्ये पृथिवीक्षिताः कौरवार्थे पराक्रांताः
संग्रामे निधनं गताः यथाभागं यथोत्साहं भवंतः कृतपौरुषाः भागो वशिष्ट एकोयं मम शल्यो महारथः सोहमद्य
युधा जेतुमाशंसे मद्रकेश्वरं अत्र यन्मानसं मह्यं तत्सर्वं निगदामि वः चक्ररक्षाविमौ शूरौ मम माद्रवतीसुतौ अ
जेयौ वासवेनापि समरे वीरसंमतौ साध्विमौ मातुलं युद्धे क्षत्रधर्मपुरस्कृतौ मदर्थं प्रतियुध्येतां मानार्हौ सत्यसं
गरौ मां वा शल्यो रणे हंता तं वाहं भद्रम[illegible]स्तु वः इति सत्यामिमां वाणीं लोकवीरा निबोधत योत्स्येहं मातुले
नाद्य क्षत्रधर्मेण पार्थिवाः स्वयं समभिसंधाय विजयायेतराय वा तस्य मेभ्यधिकं शस्त्रं सर्वोपकरणानि च
संयुंजंतु रणे क्षिप्रं शास्त्रवद्रथयोजकाः शैनेयो दक्षिणं चक्रं धृष्टद्युम्नस्तथोत्तरं पृष्ठगोपो भवत्वद्य मम पा
र्थो धनंजयः पुरस्सरो ममाद्यास्तु भीमः शस्त्रभृतां वरः एवमभ्यधिकः शल्याद्भविष्यामि महामृधे एवमुक्ता श्रीराम०

त ३

स्तथाचक्रुः सर्वराजः प्रियैषिणः ततः प्रहर्षः सैन्यानां पुनरासीन्महामृधे पंचालानां सोमकानां मत्स्यानां च विशेषतः
प्रतिज्ञातां च संग्रामे धर्मराजस्य पूजयन् ततः शंखाश्च भेरीश्च शतशश्चैव पुष्कलान् अवादयंत पांचालाः सिंहनादं
श्च नेदिरे तेभ्यधावंत समरे मद्रराजं तरस्विनः महता हर्षजेनाथ नादेन कुरुपुंगवाः ह्लादेन गजघंटानां शंखा
नां निनदेन च तूर्यशब्देन महता नादयंतश्च मेदिनीं तान्प्रत्यगृह्णात्पुत्रस्ते मद्रराजश्च वीर्यवान् महामेघानि
व बहूञ्शैलावस्तोदयावुभौ शल्यस्तु समरश्लाघी धर्मराजमरिंदमं ववर्ष शरवर्षेण वर्षेणमघवानिव
तथैव कुरुराजोपि प्रगृह्य रुचिरं धनुः द्रोणोपदेशान्विविधान्दर्शयानो महामनाः ववर्ष शरवर्षाणि चित्रं
लघु च सुष्ठु च ॥ न चास्य विवरं कश्चिद्ददर्श चरतो रणे तावुभौ विविधैर्बाणैस्ततक्षाते परस्परं शार्दूलावामि
षप्रेप्सू पराक्रांतौ विवाहवे भीमस्तु तव पुत्रेण रणशौंडेन संगतः पांचाल्यः सात्यकिश्चैव माद्रीपुत्रौ च पां
डवौ शकुनिप्रमुखान्वीरान्प्रत्यगृह्णात्समंततः तदासीत्तुमुलं युद्धं पुनरेव जयैषिणां तावकानां परेषां
च राजन्दुर्मंत्रिते तव दुर्योधनस्तु भीमस्य शरेणानतपर्वणा चिच्छेदादिश्य संग्रामे ध्वजं हेमविभूषितं
स किंकिणीकजालेन महता चारुदर्शनः पपात रुचिरः संख्ये भीमसेनस्य मारिष पुनश्चापि धनुश्चि
त्रं गजराजकरोपमं क्षुरेण शितधारेण प्रचकर्त नराधिपः सच्छिन्नधन्वा तेजस्वी रथशक्त्या सुतं तव विभेदोर

शिविरं क्षिप्रं सरथोपस्थमाविशत् । तस्मिन्मोहमनुप्राप्ते पुनरेव वृकोदरः । यंतुरस्य शिरः कायात्क्षुरप्रेणाहरत्तदा । ह
तसूता हयास्तस्य रथमादाय भारत । मद्रराजरणे राजन् हाहाकारस्तदाभवत् । तमभ्यधावत्त्राणार्थं द्रोणपुत्रो महा
रथः । कृपश्च कृतवर्मा च पुत्रं तव परीप्सवः । तस्मिन्विलुलिते सैन्ये त्रस्तास्तस्य पदानुगाः । गांडीवधन्वा विस्फार्य धनुस्ता
न्महच्छरैः । युधिष्ठिरस्तु मद्रेशमभ्यधावदमर्षितः । स्वयं संचोदयन्नश्वान्दंतवर्णान्मनोजवान् । तत्राद्भुतमपश्याम कुं
तीपुत्रे युधिष्ठिरे । पुरा भूत्वा मृदुर्दांतो यत्तदा दारुणोऽभवत् । विवृत्ताक्षश्च कौंतेयो वेपमानश्च मन्युना । चिच्छेद योधा
न्शितैर्भल्लैः शतसहस्रशः । यां यां प्रत्युदियात्सेनां तां तां ज्येष्ठः स पांडवः । शरैरपातयद्राजन् गिरीन्वज्रैरिवोत्तमैः ।
साश्वसूतध्वजरथान् रथिनः पातयन्बहून् । आक्रीडदेको बलवान्पवनस्तोयदानिव । साश्वारोहांश्च तुरगा
न्पत्तींश्चैव सहस्रशः । व्यपोथयत संग्रामे क्रुद्धो रुद्रः पशूनिव । शून्यमायोधनं कृत्वा शरवर्षैः समंततः । अभ्य
द्रवत मद्रेशं तिष्ठ शल्येति चाब्रवीत् । तस्य तच्चरितं दृष्ट्वा संग्रामे भीमकर्मणः । वित्रेसुस्तावकाः सर्वे शल्यस्त्वेनं सम
भ्ययात् । ततस्तौ तु सुसंरब्धौ प्रध्माप्य सलिलोद्भवौ । समाहूय तदान्योन्यं भर्त्सयंतौ समीयतुः । शल्यस्तु शरवर्षे
ण युधिष्ठिरमवाकिरत् । मद्रराजं तु कौंतेयः शरवर्षैरवाकिरत् । व्यदृश्येतां तदा राजन्कंकपत्रिभिराहवे । उद्भिन्नरु
धिरौ वीरौ मद्रराजयुधिष्ठिरौ । पुष्पिताविव रेजाते वने शाल्मलिकिंशुकौ । दीप्यमानौ महात्मानौ ननदतुर्युद्धदुर्मदौ

दृष्ट्वासर्वाणिसैन्यानिनाभ्यवर्त्तत्पांडवः अर्जुनंरहत्वामद्राधिपंपार्थोभोक्ष्यतेधवसुंधरां शल्योपिपांडवंहत्वादद्याद्दुर्योधना
यगां इतीवनिश्चयोनामूद्योधानांतत्रभारत प्रदक्षिणमभूत्सर्वंधर्मराजस्यपश्यतः ततःशरशतंशल्योमुमोचा
जपुधिष्ठिरे धनुश्चास्यशिताग्रेणवाणेननिरकृंतत सोन्यत्कार्मुकमादायशल्यंशरशतैस्त्रिभिः आविध्यत्का
र्मुकंचास्यक्षुरेणनिरकृंतत अथास्यनिजघानाश्वान्चतुरोनतपर्वभिः द्वाभ्यामतिशिताग्राभ्यामुभौचपार्ष्णि
सारथी ततोस्यदीप्यमानेनपीतेननिशितेनच प्रमुखेवर्त्तमानस्यभल्लेनापाहरद्ध्वजं ततःप्रभग्नंतत्सैन्यंदौ
र्योधनमरिंदम ततोमद्राधिपंद्रौणिरभ्यवर्त्ततथाकृतं आरोप्यस्वरथंचैनंत्वरमाणःप्रदुद्रुवे मुहूर्त्तमिव
तौगत्वानर्दमानेयुधिष्ठिरे स्थित्वाततोमद्रपतिरन्यंस्पंदनमास्थितः विधिवत्कल्पितंदिव्यंमहांबुदनिना
दितं सज्जयंत्रोपकरणंद्विषतोलोमहर्षणं महाभारतेशल्यपर्वणि संजयउवाच अथान्यद्धनुरादाय
बलवद्वेगवत्तरं युधिष्ठिरंमद्रपतिर्विद्ध्वासिंहइवानदत् ततःसशरवर्षेणपर्जन्यइववृष्टिमान् अभ्यव
र्षदमेयात्माक्षत्रियान्क्षत्रियर्षभः सात्यकिंदशभिर्विद्ध्वाभीमसेनंत्रिभिस्तथा सहदेवंत्रिभिर्विद्ध्वायुधि
ष्ठिरमपीडयत् तांस्तानन्यान्महेष्वासान्साश्वान्सरथकुंजरान् अर्दयामासविशिखैरुल्काभिरिवकुंजरान् कुं
जरान्कुंजरारोहानश्वानश्वप्रयायिनः रथांश्चरथिभिःसार्द्धंजघानरथिनांवरः बाहूंश्चिच्छेदसमरेसायुधा

२०

२३

वृकेतनानिच वकारवै महीयोघैस्तीर्णावेदीं कुशैरिव तथातमरिसैन्यानिघ्नंतंमृत्युमिवांतकं परिवव्रुर्भृशंक्रुद्धाः
पांडुपांचालसोमकाः तंभीमसेनश्च शिनेश्च नप्तामाद्रीसुपुत्रौ पुरुषप्रवीरौ समागतंभीमबलेनराज्ञापर्यापु
मन्योन्यमथाद्रवंत ततस्तु शूराः समरेनरेंद्रमद्रेश्वरं प्राप्य युधांवरिष्ठं आवार्यचैनं समरेनृवीरं जघ्नुः शरैः पत्रि
भिरुग्रवेगैः संरक्षितो भीमबलेनराजा माद्रीसुताभ्यामथमाधवेन मद्राधिपं पत्रिभिरुग्रवेगैः स्तनांतरे धर्मसु
तो निजघ्ने ततोरणे तावकानां रथौघाः समीक्ष्य मद्राधिपतिं शरार्त्तं पर्यावव्रुः प्रवराः सर्वशश्च दुर्योधनस्यानुम
ते समंतात ततो द्रुतंमद्रजनाधिपोरणे युधिष्ठिरं सप्तभिरभ्यविध्यत तंचापि पार्थो नवभिः पृषत्कैर्विव्याध राजं
स्तुमुले महात्मा आकर्णपूर्णायतसंप्रयुक्तैः शरैस्तथा संयति तैलधौतैः अन्योन्यमाच्छादयतौ महारथौ
मद्राधिपश्चापि युधिष्ठिरश्च ततस्तु तूर्णं समरे महारथौ परस्परस्यांतरमीक्षमाणौ शरैर्भृशं विव्यधतुर्नृपो
त्तमौ महाबलौ शत्रुभिरप्रधृष्यौ तयोर्धनुर्ज्यातलनिस्वनो महानमहेंद्रवज्राशनितुल्यनिस्वनः परस्प
रं बाणगणैर्महात्मनोः प्रवर्षतोर्मद्रपपांडुवीरयोः तौचेरतुर्व्याघ्रशिशुप्रकाशौ महावनेष्वामिषगृद्धिनाविव ॥
विषाणिनौ नागवराविवोभौ ततक्षतुः संयुगजातदर्पौ ततस्तु मद्राधिपतिर्महात्मा युधिष्ठिरं भीमबलं प्रस
ह्य विव्याधवीरं हृदयेतिवेगं शरेण सूर्याग्निसमप्रभेण ततोतिविद्धोथयुधिष्ठिरस्तदा सुसंप्रयुक्तेन शरेण श्रीराम०

सु १

राजन् जघानमद्राधिपतिंमहात्मामुदंचवतेमेत्रथमःकुरूणां ततोमुहूर्त्तादिवपार्थिवेंद्रोलब्धासंज्ञांक्रोधसंरक्तने
त्रः शतेनपार्थंत्वरितोजघानसहस्रनेत्रप्रतिमप्रभावः त्वरंस्ततोधर्मसुतोमहात्माशल्यस्यक्रुद्धोनवभिःपृषत्कै
ः भित्वाउरस्तपनीयंचवर्म्मजघानषड्भिस्त्वरितःपृषत्कैः ततस्तुमद्राधिपतिःप्रहृष्टोधनुर्विकृष्यव्यसृजन्पृष
त्कान् द्वाभ्यांक्षुराभ्यांचतथैवराज्ञश्चिछेदचापंकुरुपुंगवस्य नवंततोन्यत्समरेप्रगृह्यराजाधनुर्घोरतरंमहा
त्मा शल्यंहिविव्याधशरैः समंताद्यथामहेंद्रोनमुचिंशिताग्रैः ततस्तुशल्योनवभिःपृषत्कैर्भीमस्यराज्ञश्चयु
धिष्ठिरस्य निकृत्यरौक्मेपटुवर्मणीतयोर्विदारयामासभुजौमहात्मा ततोपरेणज्वलनार्कतेजसाक्षुरेणरा
ज्ञोधनुरुन्ममाथ कृपश्चतस्यैवजघानसूतंषड्भिः शरैःसोभिमुखंपपात मद्राधिपश्चापियुधिष्ठिरस्यश
रैश्चतुर्भिर्निजघानवाहान् वाहांश्चहत्वाव्यकरोन्महात्मायोधक्षयंधर्मसुतस्यराज्ञः तथाकृतेराजनि
भीमसेनोमद्राधिपस्याशुततोमहात्मा छित्वाधनुर्वेगवताशरेणद्वाभ्याममविध्यत्सुभृशंनरेंद्रं अथापरे
णास्यजहारयंतुःकायाछिरःसंनहनीयमध्यात् जघानचाश्वांश्चतुरःसुशीघ्रांस्तदाभृशंकुपितोभीमसेनः
तमग्रणीःसर्वधनुर्धराणांएकंचरंतंसमरेतिवेगं भीमःशतेनव्यकिरच्छराणांमाद्रीपुत्रःसहदेवस्तथैव तैःसा

शा०

पर्यंकेमोहितंवीक्ष्यशल्यंभीमः शरैरस्यचकर्त्तवर्म्म समीमसेनेननिकृत्तवर्मा मद्राधिपश्चर्म्मसुप्रतारं प्रगृह्य [illegible]
खड्गंचरथान्महात्मा प्रास्कंदयत्कुंतीसुतमभ्यधावत् छित्वारथेषां नकुलस्यसोथयुधिष्ठिरंभीममवेक्ष्यधावत्

तंचापिराजानमथोत्पतंतं क्रुद्धंयथैवांतकमापतंतं धृष्टद्युम्नो द्रौपदेयाः शिखंडी शिनेश्चनप्ता सहसापरीयुः
अथास्यचर्म्माप्रतिमंन्यकृंतत् भीमो महात्मा दशभिः पृषत्कैः खड्गंचभल्लेनचकर्त्तमुष्टौ नदन्प्रहृष्टस्तवसैन्यमध्ये
तत्कर्म्मभीमस्यसमीक्ष्यहृष्टास्तेपांडवानांप्रवरारथौघाः नादंप्रचक्रुर्भृशमुत्स्मयंतः शंखांश्चदध्मुः शशिसन्निकाशान्
तेनाथशब्देनविभीषणेन तथाभितप्तंबलमप्रहृष्टं स्वेदाभिभूतंरुधिरोक्षितांगंविसंज्ञकल्पंचतथाविषण्णं
समद्रराजः सहसावकीर्णो भीमाग्रगैः पांडवयोधमुख्यैः युधिष्ठिरस्याभिमुखं जवेनसिंहोयथामृगहेतोः प्रयातः
सधर्मराजोनिहताश्वसूतः क्रोधेनदीप्तज्वलनप्रकाशः दृष्ट्वातुमद्राधिपतिंसहृष्टं समभ्यधावत्तमरिंबलेन
गोविंदवाक्यंत्वरितंविचिंत्यदध्रेमतिंशल्यविनाशनाय सधर्मराजोनिहताश्वसूतोरथेवितिष्ठन्शक्तिमेवाभिकांक्षन्
तच्चापिशल्यस्यनिशम्यकर्म्ममहात्मनोभागमथावशिष्टं स्मृत्वामनः शल्यवधेयतात्मा यथोक्तमिंद्रावरजस्यचक्रे
सधर्मराजोमणिहेमदंडां जग्राहशक्तिंकनकप्रकाशां नेत्रेचदीप्तेसहसाविवृत्य मद्राधिपंक्रुद्धमना निरैक्षत निरीक्षि

श्रीराम०

तोवेन नरदेवराज्ञा पूतात्मना निर्हृतकल्मषेण अभूद्रूपमसमग्रराजन्नद्भुतं मे प्रतिभाति राजन् ततस्तु शक्तिं
रुचिराग्रदंडां मणिप्रवालोज्वलितां प्रदीप्तां विक्षेपवेगात्सुभृशं महात्मा मद्राधिपाय प्रवरः कुरूणां दी
प्तामथैनां घटितां बलेन सविस्फुलिंगां सहसा पतंतीं प्रैक्षंत सर्वे कुरवः समेता दिवो युगांते महतीमिवोल्कां
तां कालरात्रीमिव पाशहस्तां यमस्य धात्रीमिव चोग्ररूपां सब्रह्मदंडप्रतिमाममोघां ससर्ज यत्तो युधि धर्मरा
जः गंधस्रगग्र्यासनपानभोजनैरभ्यर्चितां पांडुसुतैः प्रयत्नात् संवर्तकाग्निप्रतिमां ज्वलंतीं कृत्यामथर्वांगि
रसीमिवोग्रां ईशानहेतोः प्रतिनिर्मितां तां त्वष्ट्रा रिपूणामसुदेहभक्षां भूम्यंतरिक्षं तु जलाशयानि प्र
सह्य भूतानि निहंतुमीशां घंटापताकामणिवज्रभाजां वैदूर्यचित्रां तपनीयदंडां त्वष्ट्रा प्रयत्नान्नियमेन कॢप्तां
ब्रह्मद्विषामंतकराममोघां बलप्रयत्नादधिरूढवेगां मंत्रैश्च घोरैरभिमंत्र्य यत्नात् ससर्ज मार्गेण च तां परे
ण वधाय मद्राधिपतेस्तदानीं हतोस्यसावित्यभिगर्जमानो रुद्रोंधकायांतकरं यथेषुं प्रसार्य बाहुं सु
दृढं सुपाणिं क्रोधेन नृत्यन्निव धर्मराजः तां सर्वशक्त्या प्रहितां सुशक्तिं युधिष्ठिरेणाप्रतिवार्यवी
र्यां प्रतिग्रहायाभिननर्द शल्यः सम्यग्घुतामग्निरिवाज्यधारां सा तस्य मर्माणि विदार्य शुभ्रमुरो वि
शालं च तथैव भित्वा विवेश गां तोयमिवाप्रसक्ता यशो विशालं नृपतेर्दहंती नासाक्षिकर्णास्यविनिःसृ

तेनप्रसंदनोवप्रणासंभवेनसंसुक्तगात्रोरुधिरेणाप्लो भूत्क्रौंचोयथाकंदहतोमहाद्रिः प्रसार्य्यबाहूसहसागतो
गांसंछिन्नवर्म्माकुरुनंदनेन महेन्द्रवाहप्रतिमोमहात्मावज्राहतंशृंगमिवाचलस्य बाहुप्रसार्याभिमुखो
धर्मराजस्यमद्रराट् ततोनिपतितोभूमाविंद्रध्वजमिवोच्छ्रितः सतथाभिन्नसर्वांगोरुधिरेणसमुक्षि
तः प्रत्युद्गतइवप्रेम्णाभूम्यासनरपुंगवः प्रिययाकांतयाकांतःपतमानइवोरसि चिरंभुक्तावसुमतीप्रि
यंकांतामिवप्रभुः सर्वैरंगैः समाश्लिष्यप्रसुप्तइवसोभवत् धर्म्येधर्मात्मनायुद्धेनिहतोधर्मसूनुना सम्यग्घु
तइवस्विष्टःप्रशांतोग्निरिवाध्वरे शक्त्याविभिन्नहृदयंविप्रमुक्तायुधध्वजं प्रशांतमपिमद्रेशंलक्ष्मीर्नैवव्यमुंचत त
तोयुधिष्ठिरश्चापमादायेंद्रसमप्रभं व्यधमद्द्विषतःसंख्येखगराडिवपन्नगान् देहांश्चनिशितैर्भल्लैरिपूणांनाश
यत्क्षणात् ततःपार्थस्यबाणौघैरावृत्तास्सैनिकास्तव निमीलिताक्षाःक्षिण्वंतोभृशमन्योन्यमर्दिताः स्य
दंतोरुधिरंदेहैर्विशस्त्रायुधजीविताः ततःशल्येनिपतितेमद्रराजानुजोयुवा भ्रातुःसर्वैर्गुणैस्तुल्योरथी
पांडवमभ्ययात् विव्याधचनरव्याघ्रोनाराचैर्बहुभिस्त्वरन् हतस्यापचितिंभ्रातुश्चिकीर्षुर्युद्धदुर्म्मदः तंविव्या
धाशुगैःषड्भिर्धर्मराजस्त्वरन्निव कार्मुकंचास्यचिच्छेदक्षुराभ्यांध्वजमेवच ततोस्यदीप्यमानेनसुदृढेनशितेनच प्र
मुखेवर्त्तमानस्यभल्लेनापाहरच्छिरः सकुंडलंतद्ददृशेपतमानंशिरोरथात् पुण्यक्षयमिवप्राप्यपतंतंस्वर्गवासिनं

श्री एम०

२१०
२५
दु४

तस्यापकृष्टशीर्षंतच्छरीरंपतितंरथात् रुधिरेणावसिक्तांगंदृष्ट्वासैन्यमभज्यत विचित्रकवचेतस्मिन्हतेमद्रनृपात्मजे
हाहाकारंप्रकुर्वाणाःकुरवोविप्रदुद्रुवुः शल्यानुजंहतंदृष्ट्वातावकास्त्यक्तजीविताः वित्रेसुःपांडवभयाद्रजोध्वस्तास्त
थाभृशं तांस्तथाभज्यतस्त्रस्तान्कौरवान्भरतर्षभ शिनेर्नप्ताकिरन्बाणैरभ्यवर्त्ततसात्यकिः तमापांतंमहेष्वास
मप्रसह्यंदुरासदं हार्दिक्यस्त्वरितोराजन्प्रत्यगृह्णादभीतवत् तौसमेतौमहात्मानौवार्ष्णेयावपराजितौ हार्दि
क्यःसात्यकिश्चैवसिंहाविवमदोत्कटौ इषुभिर्विमलाभासैश्छादयंतौपरस्परं अर्चिर्भिरिवसूर्यस्यदिवाकरस
मप्रभौ चापमार्गबलोद्धतान्मार्गणान्वृष्णिसिंहयोः आकाशेसमपश्यामपतंगानिवशीघ्रगान् सात्यकिंद
शभिर्विध्वाहयांश्चास्यत्रिभिःशरैः चापमेकेनचिच्छेदहार्दिक्योनतपर्वणा तन्निकृत्तंधनुःश्रेष्ठमपास्यशिनि
पुंगवः अन्यदादत्तवेगेनबलवत्तरमायुधं तदादायधनुःश्रेष्ठंवरिष्ठःसर्वधन्विनां हार्दिक्यंदशभिर्बाणैःप्रत्य
विध्यत्स्तनांतरे ततोरथंयुगेषांचछित्वाभल्लैःसुपत्रिभिः अश्वांस्तथावधीत्तूर्णंमुमोचपार्ष्णिसारथी ततस्तं
विरथंदृष्ट्वाकृपःशारद्वतःप्रभो अपोवाहततःक्षिप्रंरथमारोप्यवीर्यवान् मद्रराजेहतेराजन्विरथेकृतवर्म
णि दुर्योधनबलंसर्वंपुनरासीत्पराङ्मुखं अपरेनावबुध्यंतसैन्येचरजसावृते बलंतुहतभूयिष्ठंतत्तदासीत्परा
ङ्मुखं ततोमुहूर्त्तात्तेपश्यन्रजोभौमंसमुत्थितं विविधैःशोणितस्रावैःप्रशांतंपुरुषर्षभ ततोदुर्योधनोदृष्ट्वाभग्नंस्व

बलमंतिकाच्च जवेनाप ततः पार्थानेकः सर्वानवारयत् पांडवान्स्रथान्दृष्ट्वा धृष्टद्युम्नंचपार्षतं आनर्त्तंचदुराधर्षंशितैर्वाणैरवा
किरत् तेरणाद्भूपवर्त्तंतमर्त्यामृत्युमिवपातं अथान्यंरथमास्थायहार्दिक्योपिन्यवर्त्तत ततोयुधिष्ठिरोराजात्वरमाणोमहा
रथः चतुर्भिर्निजघानाश्वान्पत्रिभिःकृतवर्मणः विव्याधगौतमंचापिषड्भिर्भल्लैःसुतेजनैः अश्वत्थामाततोराज्ञाहार्दि
क्यंविरथीकृतं तमपोवाहहार्दिक्यंसुरथेनयुधिष्ठिरात् ततःशारद्वतोष्टाभिःप्रत्यविध्यद्युधिष्ठिरं विव्याधचाश्वान्निशि
तैस्तथाष्टाभिःशिलीमुखैः एवमेतन्महाराजयुद्धशेषमवर्त्तत तवदुर्मंत्रितेराजन्सहपुत्रस्यभारत तस्मिन्महे
ष्वासवरेविशस्ते संग्राममध्येकुरुपुंगवेन पार्थाःसमेताःपरमप्रहृष्टाःशंखान्प्रदध्मुर्हतमीक्ष्यशल्यं युधिष्ठि
रंचप्रशशंसुराजौपुरासुरावृत्रवधेयथेंद्रं चक्रुश्चनानाविधवाद्यशद्वान्निनादयंतोवसुधांसमंतात् महाभार
तेशल्यपर्वणिशल्यवधः॥ ॥संजयउवाच शल्येतुनिहतेराजन्मद्रराजपदानुगाः रथाःसप्तशतावीरा
निर्ययुर्महतोबलात् दुर्योधनस्तुद्विरदमारुह्याचलसंनिभं छत्रेणाध्रियमाणेनवीज्यमानश्चचामरैः
नगंतव्यंनगंतव्यमितिमद्रानवारयत् दुर्योधनेनतेवीरावार्यमाणाःपुनःपुनः युधिष्ठिरंजिघांसंतःपांडु
नांप्राविशद्बलं तत्रशूरामहाराजकृतचित्तासुयोधने धनुःशब्दंमहत्कृत्वासहायुध्यंतपांडवैः श्रुत्वातुनि
हतंशल्यंधर्मपुत्रंचपीडितं मद्रराजप्रियासक्तैर्मद्रकानांमहारथैः आजगामततःपार्थोगांडीवंविक्षिपन्धनुः

श्रीराम०

पूरयन्रथघोषेण दिशः सर्वा महारथाः ततोऽर्जुनश्च भीमश्च माद्रीपुत्रौ च पांडवौ सात्यकिश्च नरव्याघ्रो द्रौपदेया
श्च सर्वशः धृष्टद्युम्नः शिखंडी च पांचालाः सह सोमकैः युधिष्ठिरं परीप्संतः समंतात्पर्यवारयन् ते समंतात्प
रिवृताः पांडवाः पुरुषर्षभाः क्षोभयंति स्म सेनां तां मकराः सागरं यथा वृक्षानिव महावाताः कंपयंति स्म तावका
न् पुरोवातेन गंगेव क्षोभमाणा महानदी अक्षोभ्यत तदा राजन् पांडूनां ध्वजिनी पुनः प्रस्कंद्य सेनां महतीं महात्मा
नो महारथाः वृक्षानिव महावाताः कंपयंति स्म तावकाः प्रचुक्रुशुस्तत्र तत्र क्व स राजा युधिष्ठिरः भ्रातरः पांड
वाः शूराः दृश्यंते नेह किंचन पंचालानां महावीर्यः शिखंडी वा महारथः धृष्टद्युम्नोथ शैनेयो द्रौपदेया महा
रथाः एवं तान्वादिनः शूरान् द्रौपदेयाश्च सर्वशः अभ्यघ्नन्युयुधानश्च मद्रराजपदानुगान् रथैश्च पति
तैः केचित्केचिच्छिन्नैर्महाध्वजैः प्रत्यदृश्यंत समरे तावका निहताः परैः आलोक्य पांडवान्युद्धे योधा
न्राजन्सहस्रशः वार्यमाणाः प्रवीरास्तव पुत्रेण भारत दुर्योधनस्तु तान्वीरान्वारयामास सांत्वयन् न चा
स्य शासनं कश्चित्तत्र चक्रे महारथः ततो गांधारराजस्य पुत्रः शकुनिरब्रवीत् दुर्योधनं महाराज वचनं वच
नक्षमः किं च नः प्रेक्षमाणानां मद्राणां हन्यते बलं न युक्तमेतत्समरे त्वयि तिष्ठति भारत सहितैर्नाम यो
द्धव्यमित्येवं समयः कृतः अथ कस्मात्परान्नेवं घ्नतो मर्षयसे नृप दुर्योधन उ० वार्यमाणा मया पूर्वं नैव

चक्रुर्वै मम एते हि सहिताः सर्वे प्रस्कंनाः पांडुवाहिनीं शकुनिरुवाच नमस्तैः शासनं वीरा रणे कुर्वंत्यमर्षिताः
अलं क्रोद्धुं तथैतेषां नायं कालउपेक्षितुं यात सर्वेत्र संभूय स वाजिरथकुंजराः परित्रातुं महेष्वासान्मद्रराजपदा
नुगान् अन्योन्यं परिरक्षामो यत्नेन महता नृप एवं सर्वे तु संचिंत्य प्रययुर्यत्र सैनिकाः संजय उ० एवमुक्तस्ततो
राजा बलेन महता वृतः प्रययौ सिंहनादेन कंपयन्निव वसुंधरां हत विध्यत गृह्णीत प्रहरध्वं निकृंतत इत्यासीत्तु
मुलः शब्दस्तव सैन्यस्य भारत पांडवास्तु रणे दृष्ट्वा मद्रराजपदानुगान् सहितानभ्यवर्तंत गुल्ममास्थाय मध्यमं
ते मुहूर्ताद्रणे वीरा हस्तावापं विशांपते निहताः प्रत्यदृश्यंत मद्रराजपदानुगाः ततो नः संप्रयातानां हतमित्रा
स्तरस्विनः हृष्टाः किलकिलाशब्दमकुर्वन्सहिताः परे अथोत्थितानि रुंडानि समदृश्यंत सर्वशः पपात म
हती चोल्का मध्येनादित्यमंडलात् रथैर्भग्नैर्युगाक्षैश्च निहतैश्च महारथैः अश्वैर्निपतितैश्चैव संछन्नाभू
द्वसुंधरा वातायमानैस्तुरगैर्युगासक्तैस्ततस्ततः अदृश्यंत महाराज योधास्तत्र रणाजिरे भग्नचक्रान्रथा
न्केचिदवहंस्तावकान्रणे रथार्धं केचिदादाय दिशो दश विबभ्रमुः तत्र तत्र च दृश्यंते योक्त्रैः श्लिष्टाः स्म वाजि
नः रथिनः पतमानाश्च व्यदृश्यंत नरोत्तम गगनात्प्रच्युताः सिद्धाः पुण्यानामिव संक्षये निहतेषु च शूरेषु
मद्रराजानुगेषु वै अस्मानापततश्चैव दृष्ट्वा पार्था महारथाः अभ्यवर्तंत वेगेन जयगृध्नाः प्रहारिणः बाणशब्द

श्रीराम०

रथान्कांचनविभिन्नानशंखवर्णनिस्वनैः असमासुपुनरासाद्यलक्षलक्षाः प्रहारिणः बाणांश्छूरवान्कृत्वासिंहनादान्प्रचु
क्रुशुः दृष्ट्वाहतमभिप्रेक्ष्यमद्रराजबलंमहत मद्रराजंचसमरेदृष्ट्वाशूरंनिपातितं दुर्योधनबलंसर्वंपुनरासी
त्पराङ्मुखं वध्यमानंमहाराजपांडवैर्जितकाशिभिः दिशोभेजेथसंभ्रांतंत्रासितंदृढधन्विभिः महाभारतेशल्य
पर्वणि संजयउवाच पातितेयुधिदुर्धर्षेमद्रराजेमहारथे तावकास्तवपुत्राश्चप्रायशोविमुखाभवन वणि
जोनाविभिन्नायांयथागाधेप्लवेप्लवे अपारेपारमिच्छंतोहतेशूरेमहात्मना मद्रराजेमहाराजवित्रस्ताःशर
विक्षताः अनाथानाथमिच्छंतोमृगाःसिंहार्दिताइव वृषायथाभग्नशृंगाःशीर्णदंतागजाइव मध्याह्नेप्रत्यपा
याम निर्जिताजातशत्रुणा नसंधातुमनीकानिनचराजन्पराक्रमे आसीद्बुद्धिर्हतेशल्येतवयोधस्यकस्य
चित भीष्मेद्रोणेचनिहतेसूतपुत्रेचभारत यद्दुःखंतवयोधानांभयंचासीद्विशांपते तद्भयंसचनःशोकोभू
यएवाभ्यवर्तत निराशाश्चजयेराजन्हतेशल्येमहारथे हतप्रवीराविध्वस्तानिकृत्ताश्चशितैःशरैः मद्र
राजेहतेराजन्योधास्तेप्राद्रवन्भयात अश्वानन्येगजानन्येरथानन्येमहारथाः आरुह्यजवसंपन्नाः
पादाताःप्राद्रवन्भयात द्विसाहस्राश्चमातंगागिरिरूपाःप्रहारिणः संप्राद्रवन्हतेशल्येअंकुशांगुष्ठ
चोदिताः तेरणाद्भरतश्रेष्ठतावकाःप्राद्रवन्भयात धावंतश्चाप्यदृश्यंतश्वसमानाःशराहताः तान्प्रभग्ना

२७ सुतान्दृष्ट्वा हतोत्साहान्पराजितान् अभ्यद्रवंत पांचालाः पंचालाश्च जयैषिणः बाणशब्दरवाश्चैव सिंहनाद
श्च पुष्कलः शंखनादश्च शूराणां दारुणाः समपद्यत दृष्ट्वा तु कौरवं सैन्यं भयत्रस्तं प्रविद्रुतं अन्योन्यं समभाषं
२८ त पांचालाः पांडवैः सह अथ राजा सत्यधृतिर्जितामित्रो युधिष्ठिरः अथ दुर्योधनो हीनो दैपायनपतिश्रियः
अथ श्रुत्वा हतं पुत्रं धृतराष्ट्रो जनेश्वरः विह्वलः पतितो भूमौ किल्बिषं प्रतिपद्यत अथ जानातु कौंतेयं समम
र्थं सर्वधन्विनां अथात्मानं तु दुर्मेधा गर्हयिष्यति पापकृत अथ कृष्णस्तु वचः सत्यं संस्मरतां ब्रुवतो हितं अ
थ प्रभृति पार्थाश्च प्रेष्यभूतं तु पाचरन् विजानातु नृपो दुःखं यत्प्राप्तं पांडुनंदनैः अथ कृष्णस्य माहात्म्यं जा
नातु समहीपतिः अथार्जुन धनुर्घोषं घोरं जानातु संयुगे अस्त्राणां तु बलं सर्वं बाह्वोश्च बलमाहवे अ
थ जानातु भीमस्य बलं घोरं महाबलं जानीताम अजेयस्य पांडवस्य पराक्रमं मद्रराजं हतं श्रुत्वा दैवै
रपि दुरासदं अथ जानातु संग्रामे माद्रीपुत्रौ च पांडवौ निहतं सौबलं शूरं गांधारं सुबलं सर्वशः कथं तेषां
जयो न स्याद्येषां योद्धा धनंजयः सात्यकिर्भीमसेनश्च धृष्टद्युम्नश्च पार्षतः द्रौपदीतनयाः पंच माद्रीपु
त्रौ च पांडवौ शिखंडी च महेष्वासो राजा चैव युधिष्ठिरः येषां च जगतां नाथो नाथः कृष्णो जनार्दनः
कथं तेषां जयो न स्याद्येषां धर्मो व्यपाश्रयः भीष्मं द्रोणं च कर्णं च मद्रराजानमेव च अथान्यान्नृपतीन्स

श्रीराम०

वीकृतशोधसहस्रशः कोन्यः शक्रोरणेजेतुम्रतेपार्थाद्युधिष्ठिरात् यस्यनाथोहृषीकेशः सदाधर्मयशोनि
धिः इत्येवंवदमानास्तेहर्षेणमहतावृताः प्रद्युम्नासात्वकान्युद्धे संजयाः पृष्ठतोन्वयुः धनंजयोरथा
नीकमभ्यधावतवीर्यवान् माद्रीपुत्रौचशकुनिंसात्यकिश्चमहारथः तान्प्रेक्ष्यद्रवतः सर्वान्भीमसेनम
र्दितान् दुर्योधनस्तदासूतमब्रवीद्विस्मयन्निव मांप्रतिक्रमतेपार्थोधनुष्पाणिरवस्थितः जघनेस
र्वसैन्यानांममाश्वान्प्रतिपादय जघनेवर्त्तमानंहिकौंतेयोमांधनंजयः नोत्सहेदभ्यतिक्रांतुंवेलामिवम
होदधिः पश्यसैन्यंमहत्सूतपांडवैः समभिद्रुतं सैन्यरेणुंसमुद्भूतंपश्यस्वैनंसमंततः सिंहनादां
श्चबहुशः शृणुघोरान्महाभयान् तस्माद्याहिशनैःसूतजघनंपरिपालयन् मयिस्थितेचसमरेयुध्य
मानंचपांडवं पुनरावर्त्ततेसूतमामकंबलमोजसा तच्छ्रुत्वातवपुत्रस्यसूताग्र्यसदृशंवचः सारथि
र्हेमसंछन्नांछनैरश्वानचोदयत् गजाश्वरथिभिर्हीनास्त्यक्तात्मानःपदातयः एकविंशतिसाहस्राः सं
युगायावतस्थिरे नानादेशसमुद्भूतानानानगरवासिनः व्यवस्थितास्तदायोधाःप्रार्थयंतोमहद्यश
ः तेषामापततांतत्रसंहृष्टानांपरस्परं संमर्दःसुमहांजज्ञेघोररूपोभयानकः भीमसेनंतदाराजन्
धृष्टद्युम्नंचपार्षतं बलेनचतुरंगेणनानादेश्यान्यवारयन् भीममेवाभ्यवर्त्तंतरणेन्येतुपदातयः

३०

प्रक्ष्वेलास्फोटसंहृष्टा वीरलोकं यियासवः आसाद्य भीमसेनं तु संरब्धा युद्धदुर्मदाः धार्त्तराष्ट्रा विनेदुर्हि नान्यां वा
कथयन् कथां परिवार्य्य रणे भीमं निजघ्नुस्ते समंततः स वध्यमानः समरे पदातिगणसंवृतः न चचाल ततः
२७
स्थानान्मैनाक इव पर्वतः ते तु क्रुद्धा महाराज पांडवानां महारथं निग्रहीतुं प्रचक्रुर्हि योधांश्चान्यान् वारय
न् अक्रुध्यत रणे भीमस्तैरथैः पर्युपस्थितैः सोवतीर्य्य रथात्तूर्णं पदातिः समुपस्थितः जातरूपप्रतिच्छ
न्नां प्रगृह्य महतीं गदां अवधीत्तावकान् योधान् दंडपाणिरिवांतकः रथाश्वद्विपहीनांस्तु तान् भीमो
गदया बली एकविंशतिसाहस्रान् पदातीन् समपोथयत् हत्वा तत्पुरुषानीकं भीमः सत्यपराक्रमः धृ
ष्टद्युम्नं पुरस्कृत्य न चिरात् प्रत्यदृश्यत पादाता निहता भूमौ शिश्यिरे रुधिरोक्षिताः संभग्ना इव वातेन क
र्णिकाराः सुपुष्पिताः ॥ नानापुष्पस्रजोपेता नानाकुंडलधारिणः नानाजात्या हतास्तत्र नानादेश
समागताः पताकाध्वजसंछन्नं पदातीनां महद्बलं निकृत्तं विबभौ रौद्रं घोररूपं भयानकं युधिष्ठिरपु
रोगास्तु सर्वे सैन्य महारथाः अन्वधावन्महात्मानं पुत्रं दुर्योधनं तव ते सर्वे तावकान्दृष्ट्वा महेष्वासाः पराङ्मु
खान् नाभ्यवर्त्तंत ते पुत्रं वेलेव मकरालयं तदद्भुतमपश्याम तव पुत्रस्य पौरुषं यदेकं सहिताः पार्था न शेकु
रभिवर्त्तितुं नातिदूरापयातं तं कृतबुद्धिं पलायने दुर्योधनः स्वकं सैन्यमब्रवीद्भृशविक्षतं न तं देशं प्रपश्यामि श्रीराम०

पृथिव्यांपर्वतेषुच तत्रयातान्नवोहन्युःपांडवाः॥किंसतेनवः अन्यंचबतमेतेषांकश्मोवभशाविक्षतो यदि.सर्वे
त्रतिष्ठामश्रूवंनोविजयोभवेत विमयातांस्तुवोमित्रान्पांडवाः कृतकिल्बिषाः अनुसत्यहनिष्यंतिश्रे
योनःसमरेस्थितं शृणुध्वंक्षत्रियाःसर्वेयावंतोत्रसमागताः यद्यमूरंचवीहंवमारयन्पंतकःसदा
कोनुमूढोनयुध्येतपुरुषःक्षत्रियोध्रुवः अयोनोभीमसेनस्यक्रुद्धस्यप्रमुखेस्थितं सुखःसांग्रामिकोमृत्युः
क्षत्रधर्मेणयुध्यतां मर्त्येनावश्यमर्त्तव्यंगृहेष्वपिकदाचन युध्यतःक्षत्रधर्मेणमृत्युरेषःसनातनः जित्वे
हसुखमाप्नोतिहतःप्रेत्यमहाफलं नयुद्धधर्मश्रेयान्वैपंथाःस्वर्गस्यकौरवाः अचिरेणैवतान्लोकान्ह
ताग्रुद्धेत्सवाप्स्यथ श्रुत्वातुवचनंतस्यपूजयित्वाचपार्थिवाः पुनरेवान्ववर्त्तंतपांडवानाततायिनः तानापु
तएवाशुव्यूढानीकाःप्रहारिणः प्रत्युद्ययुस्ततःपार्थाजयगृध्नुःप्रमन्यवः धनंजयोरथेनाजावभ्यवर्त्त
तवीर्यवान्विश्रुतंत्रिषुलोकेषुगांडीवंप्राक्षिपद्धनुः माद्रीपुत्रौचशकुनिंसात्यकिश्चमहाबलः जवेनाभ्य
पतन्वीरायतोवैतावकंबलं॥ ॥महाभारतेशल्यपर्वणि॥ + ॥संजयउवाच सन्निहत्तेबलौघेतुथा
ल्वोम्लेच्छगणाधिपः अभ्यधावतसंक्रुद्धःपांडूनांसुमहद्बलं आस्थायसुमहानागंप्रभिन्नंपर्वतोपमं
दृप्तमैरावणप्रख्यममित्रगणमर्दनं योसौमहाभद्रकुलेप्रसूतःसुपूजितोधार्त्तराष्ट्रेणनित्यं सुकल्पितःशा

ल३

श० ३०

स्वविनिःसृतैः सद्योपवाह्यः समरेषु राजन्‌ तमास्थितो राजवरो बभूव यथोदयस्थः सविता क्षपांते स तेन नाग
प्रवरेण राजन्नभ्युद्ययौ पांडुसुतान्समंतात्‌ शितैः पृषत्कैर्विददार चापि महेंद्रवज्रप्रतिमैः सुघोरैः ततः शरा
न्वै सृजतो महारणे योधांश्च राजन्नयतो यमाय यस्यांतरं ददृशुः स्वे परे वा यथा पुरा वज्रधरस्य दैत्याः ऐराव
णस्थेन च मूं विमर्द्दतो दैत्याः पुरा वासवस्येव राजन्‌ ते पांडवाः सोमकसृंजयाश्च तमेकनागं ददृशुः समं
तात्‌ सहस्रशो वै विचरंतमेकं यथा महेंद्रस्य गजं समीपे संद्राव्यमाणां तु बलं परेषां परीतकल्पं विबभौ
समंतात्‌ नैवावतस्थे समरे भृशं भयाद्विमर्द्यमानं तु परस्परं तदा ततः प्रभग्ना सहसा महाचमूः सा पांडवी
तेन नराधिपेन दिशश्चतस्रः सहसा प्रधाविता गजेंद्रवेगं तमपारयंती दृष्ट्वा च तां वेगवतीं प्रभग्नां स
र्वे त्वदीया युधि योधमुख्याः संपूजयंतस्तु नराधिपं ते शंखांश्च दध्मुः शशिसन्निकाशान्‌ श्रुत्वा निना
दं त्वथ कौरवाणां हर्षाद्विमुक्तं सह शंखशब्दैः सेनापतिः पांडवसंजयानां पंचालपुत्रो न ममर्ष कोपा
त्‌ ततस्तु तं वै द्विरदं महात्मा प्रत्युद्ययौ त्वरमाणो जयाय जंभो यथा शक्रसमागमे वै नागेंद्रमैराव
णमिंद्रवाहं तमापतंतं सहसा च दृष्ट्वा पांचालराजं युधि राजसिंहः तं वै द्विपं प्रेषयामास तूर्णं व
धाय राजन्द्रुपदात्मजस्य स तं द्विपं सहसाभ्युपेतं तमाविध्यदग्निप्रतिमैः पृषत्कैः कर्मारधौतैर्नि

श्रीराम०

शितैर्ज्वलद्भिर्नाराचमुख्यैस्त्रिभिरजिह्मगैः ततोऽपरान्पंचशतान्महात्मा नाराचमुख्यान्विससर्ज कुंभे स तैस्तु वि
द्धः परमद्विपो रणे तदा परावृत्य भृशं प्रदुद्रुवे तं नागराजं सहसा प्रणुन्नं विद्राव्यमाणं च निगृह्य शाल्वः तोत्रां
कुशैः प्रेषयामास स तु सं पंचालराजस्य रथं प्रदिश्य दृष्ट्वापतंतं सहसा स नागं धृष्टद्युम्नः स्वरथाच्छीघ्रमेव गदां
प्रगृह्याशु जवेन वीरो भूमिं प्रपन्नो भयविह्वलांगः स तं रथं हेमविभूषितांगं साश्वं ससूतं सहसा विमृद्य उ
त्क्षिप्य हस्तेन महाद्विपोपि विपोथयामास वसुंधरातले पंचालराजस्य सुतं स दृष्ट्वा तदार्दितं नागवलेन तेन
तमभ्यधावत्सहसा जवेन भीमः शिखंडी च शिनेश्च नप्ता शरैश्च वेगं सहसा निगृह्य तस्याभितो ह्यापततो गज
स्य स संगृहीतो रथिभिर्गजो वै चचाल तैर्वार्यमाणश्च संख्ये ततः पृषत्कान्प्रववर्ष राजा सूर्यो यथा रश्मिजा
लैः समंतात् तैराशुगैर्वध्यमाना रथौघाः प्रदुद्रुवुस्तत्र ततस्तु सर्वे तत्कर्म शाल्वस्य समीक्ष्य सर्वे पांचालमत्स्या
नृपसंजयाश्च हाहाकारैर्नादयंतः स्म युद्धे द्विपं समंतादुरुधुर्नराग्र्याः पंचालराजस्त्वरितस्तु भीमो गदां प्रगृ
ह्याचलशृंगतुल्यां ससंभ्रमं भारत शत्रुघाती जवेन वीरोनुससार नागं ततस्तु नागं धरणीधराभं मदं स्रवंतं
जलदप्रकाशं गदां समाविध्य भृशं जघान पांचालराजस्य सुतस्तरस्वी स भिन्नकुंभः सहसा विनद्य मुखा
त्प्रभूतं क्षतजं विमुंचन् पपात नागो धरणीधराभः क्षितिप्रकंपे चलितो यथाद्रिः निपात्यमाने तु तदा गजेंद्रे

श० ३१

हाहाकृतेतवपुत्रस्यसैन्ये मृशाल्वराजस्यशिनिप्रवीरोजहारभल्लेनशिरः शिनेतेन हतोत्तमांगोयुधिसाल्वकेतेनपपा
नभूमौमहसंगराजा यथाद्रिशृंगंसहसाप्रभग्नंवज्रेणदेवाधिपचोदितेन महाभारतेशल्यपर्वणिशाल्ववधः
संजयउवाच तस्मिंस्तुनिहतेशूरेशाल्वेसमितिशोभने तवाभज्यद्बलंवेगाद्वातेनेवमहाद्रुमः तत्प्रभग्नंब
लंदृष्ट्वाकृतवर्मामहारथः दधारसमरेशूरःशत्रुसैन्यंमहाबलः सन्निवृत्तास्तुतेवीरादृष्ट्वासात्वतमाहवे शैलो
पमंस्थितंराजन्कीर्यमाणंशरैर्युधि ततःप्रववृतेयुद्धंकुरूणांपांडवैःसह निवृत्तानांमहाराजमृत्युंकृ
त्वानिवर्त्तनं तत्राश्चर्यमभूद्युद्धंसात्वतस्यपरैःसह यदेकोवारयामासपांडुसेनांदुरासदां तेषामन्योन्य
सुहृदांकृतेकर्मणिदुष्करे सिंहनादःप्रहृष्टानांदिवस्पृक्सुमहाबलः तेनशब्देनवित्रस्तान्पांचालान्भरतर्ष
भ शिनेर्नप्तामहाबाहुरन्वपद्यतसात्यकिः ससमासाद्यराजानंक्षेमधूर्त्तिंमहाबलं सप्तभिर्निशितैर्बा
णैरनयद्यमसादनं तमायांतंमहाबाहुंप्रक्षिपंतंशितांछरान् जवेनाभ्यपतद्धीमान्हार्दिक्यःशिनिपुं
गवं तौसिंहाविवनर्दंतौधन्विनौरथिनांवरौ अन्योन्यमभिधावेतांशस्त्रप्रवरधारिणौ पांडवाःसहपां
चालैर्योधाश्चान्येनृपोत्तम प्रेक्षकाःसमपद्यंततयोर्घोरेसमागमे नाराचैर्वत्सदंतैश्चवृष्ण्यंधकमहार
थौ अभिजघ्नतुरन्योन्यंप्रहृष्टाविवकुंजरौ चरंतौविविधान्मार्गान्हार्दिक्यशिनिपुंगवौ मुहूर्त्ताद्व्य

वै २५

श्रीरामं०

यतमानौ तौ बाणैर्हत्वा परस्परं वायुवेगबलोद्भूतान्मार्गणान्कृत्तिमिश्रिंह्रयोः आकाशे समपश्याम पतंगानिव शी
घ्रगान् तमेकं सात्यकं मोणामासाद्य हार्दिकात्मजः आविध्यन्निशितैर्बाणैश्चतुर्भिश्चतुरो हयान् सदीर्घबाहुः
संक्रुद्धस्तोत्रार्दित इव द्विपः अष्टाभिः कृतवर्माणमाविध्यत्परमेषुभिः ततः पूर्णायतोत्सृष्टैः कृतवर्मा
शिलाशितैः सात्यकिं त्रिभिराहत्य धनुरेकेन चिच्छिदे निकृत्तं तद्धनुः श्रेष्ठमपास्य शिनिपुंगवः अन्यदादत्त
वेगेन शैनेयः सशरं धनुः तदादाय धनुः श्रेष्ठं वरिष्ठः सर्वधन्विनां आरोप्य च महावीर्यो महाबुद्धिर्महाबलः
अमृष्यमाणो धनुषः छेदनं कृतवर्मणा कुपितोतिरथः शीघ्रं कृतवर्माणमभ्ययात् ततः सुनिशितै
र्बाणैर्दशभिः शिनिपुंगवः जघान सूतं वाहांश्च ध्वजं च कृतवर्मणः ततो राजन्महेष्वासः कृतवर्मा महा
रथः हताश्वसूतं संप्रेक्ष्य रथं हेमपरिष्कृतं रोषेण महताविष्टः शूलमुद्यम्य मारिष चिक्षेप भुज
वेगेन जिघांसुः शिनिपुंगवं तच्छूलं सात्वतो ह्याजौ निर्भिद्य निशितैः शरैः चूर्णितं पातयामास मोहयन्नि
व माधवं ततोपरेण भल्लेन हृद्येनं समताडयत् स युद्धे युयुधानेन हताश्वो हतसारथिः कृत
वर्मा कृतास्त्रेण धरणीमन्वपद्यत तस्मिन्सात्यकिना वीरे द्वैरथे विरथीकृते समपद्यत सर्वेषां सै
न्यानां सुमहद्भयं पुत्रस्य तव चात्यर्थं विषादः समपद्यत हतसूते हताश्वे च विरथे कृतवर्मणि ह

ताश्चैव समालक्ष्य हतस्तजमरिंदमं अन्वधावत्कृपो राजन् जिघांसुः शिनिपुंगवं तं चारोप्य रथोपस्थे
मिषतां सर्वधन्विनां कृपो वाहम्महाबाहुस्तूर्णमायोधनादपि शैनेये च स्थिते राजन् विरथे कृतवर्म्म
णि दुर्योधनबलं सर्वं पुनरासीत्पराङ्मुखं तत्परे नावबुध्यंत सैन्येतु रजसावृते तावकाः प्रद्रुता रा
जन् दुर्योधनमृते नृप दुर्योधनस्तु संप्रेक्ष्य भग्नं स्वबलमंतिकात् जवेनाभ्यपतत्तूर्णं सर्वांश्चैतान्वार
यत् पांडूंश्च सर्वान् संक्रुद्धो धृष्टद्युम्नं च पार्षतं शिखंडिनं द्रौपदेयान् पांचालानां च ये गणाः कैकयान्सो
मकांश्चैव पांचालांश्चैव मारिष असंभ्रमं दुराधर्षः शितैः शस्त्रैरवारयत् अतिष्ठदाहवे यत्तात्पुत्रस्त
व महाबलः यथा यज्ञे महानग्निर्मंत्रपूतः प्रकाशवान् तथा दुर्योधनो राजा संग्रामे सर्वतोऽभवत् तं परे
णाभ्युपद्यंत मर्त्या मृत्युमिवाहवे अथान्यं रथमास्थाय हार्दिक्यः समपद्यत महाभारते शल्यपर्वणि
संजय उवाच ॥ ॥पुत्रस्तु ते महाराज रथस्थो रथिनां वरः दुरुत्सहो बभौ युद्धे यथा रुद्रः प्रतापवान् तस्य
बाणसहस्रैस्तु प्रच्छन्ना ह्यभवन्मही परांश्च सिषिचे बाणधाराभिरिव पर्वतान् न च सोस्ति पुमान्कश्चित्पांड
वानां महाहवे हयो रथो गजो वापि योस्य बाणैरविक्षतः यं यं हि समरे योधं प्रपश्यामि विशांपते स तु
बाणैश्चितोभूद्वै पुत्रेण तव भारत यथा सैन्येन राजन्द्र समुद्धूतेन वाहिनी प्रच्छाद्यत संछन्ना तथावा

श्रीराम०

द्रोणेर्महात्मनः बाणभूतामपश्याम पृथिवीं पृथिवीपते दुर्योधनेन प्रहितान् क्षिप्रहस्तेन धन्विना तेषु योधस
हस्रेषु तावकेषु परेषु च एको दुर्योधनश्चासीत् पुमानिति मे मतिः तत्राद्भुतमपश्याम तस्य च पुत्रस्य विक्रमं
यदेनं सहिताः पार्था नान्ववर्त्तन्त भारत युधिष्ठिरं शतेनाजौ विव्याध भरतर्षभ भीमसेनं च सप्तत्या सहदेवं च स
प्तभिः नकुलं च चतुःषष्ट्या धृष्टद्युम्नं च पंचभिः सप्तभिर्द्रौपदेयांश्च त्रिभिर्विव्याध सात्यकिं धनुश्चिच्छेद भल्ले
न सहदेवस्य मारिष तदपास्य धनुश्छिन्नं माद्रीपुत्रः प्रतापवान् अभ्यधावत राजानं प्रगृह्यान्यन्महद्धनुः त
तो दुर्योधनं संख्ये विव्याध दशभिः शरैः नकुलश्च ततो वीरो राजानं नवभिः शरैः घोररूपैर्महेष्वासो विव्याध
च ननाद च सात्यकिश्चापि राजानं शरेणानतपर्वणा द्रौपदेयास्त्रिसप्तत्या धर्मराजश्च पंचभिः अशीत्या भी
मसेनश्च शरै राजानमार्दयत् समंतात्कीर्यमाणस्तु बाणवर्षैर्महात्मभिः न चचाल महाराज सर्वसैन्यस्य
पश्यतः लाघवं सौष्ठवं चापि वीर्यं चैव महात्मनः अतिमर्वाणी भूतानि ददृशुः सर्वमानवाः धार्तरा
ष्ट्रा हि राजानं योधास्तु स्वल्पमंतरं अपश्यमाना राजानं पर्यवर्त्तन्त दंशिताः तेषामापततां घोरस्तुमुलः
समजायत क्षुब्धस्य हि समुद्रस्य प्रावृट्काले यथा निशि समासाद्य रणे ते तु राजानमपराजितं प्रत्युद्य
युर्महेष्वासाः पांडवानाततायिनः भीमसेनं रणे क्रुद्धं द्रोणपुत्रो न्यवारयत् ततो बाणैर्महाराज प्रमुक्तैः सर्व

स ३

शं० तोदिशं नादयंतरणे वीरान्नदिशः प्रदिशस्तथा ताबुभौ क्रूरकर्माणावुभौ भारत दुःसहौ घोररूपमयुध्ये
तां कृतप्रतिकृतैषिणौ वासयंतौ जगत्सर्वं ज्याक्षेपकठिनत्वचौ शकुनिस्तु रणे वीरो युधिष्ठिरमतादुपत
३२ तस्याश्वांश्चतुरो हत्वा सुबलस्य सुतो मुदि नादं चकार बलवान्सर्वसैन्यानि कंपयन् एतस्मिन्नंतरे वीरं रा
जानमपराजितं अपोवाह रणे राजन्सहदेवः प्रतापवान् अथान्यं रथमास्थाय धर्मराजो युधिष्ठिरः शकु
निं नवभिर्विध्वा पुनर्विव्याध पंचभिः ननाद च महानादं प्रवरः सर्वधन्विनां तद्युद्धमभवच्चित्रं घोररूपं च
से ६ मारिष ईक्षणप्रीतिजननं सिद्धचारणसेवितं उलूकस्तु महेष्वासं नकुलं युद्धदुर्मदं अभ्यद्रवदमेयात्माश
रवर्षैः समंततः तथैनं नकुलः शूरः सौबलस्य सुतं रणे शरवर्षेण महता समंतात्पर्यवारयत् तौ तत्र
समरे वीरौ कुलपुत्रौ महारथौ योधयंतावपश्येतां परस्परकृतागसौ तथैव कृतवर्मा तु शैनेयं शत्रुतापनं यो
धयन्शुशुभे राजन्बलं शक्र इवाहवे दुर्योधनो धनुश्छित्वा धृष्टद्युम्नस्य संयुगे अथैनं छिन्नधन्वानं विव्याध
निशितैः शरैः धृष्टद्युम्नोपि समरे प्रगृह्य परमायुधं राजानं योधयामास पश्यतां सर्वधन्विनां तयोर्युद्धं महद्
थासीत्संग्रामे भरतर्षभ प्रभिन्नयोर्यथा शक्तिमत्तयोर्वनहस्तिनोः गौतमस्तु रणे क्रुद्धो द्रौपदेयान्महाबलान्
विव्याध बहुभिः शूरः शरैः संनतपर्वभिः तस्यैतैरभवद्युद्धमिंद्रियैरिव देहिनः घोररूपमसंवार्यं निर्म श्रीराम०

पोदमतीवच तेचतंपीडयामासुरिंद्रियाणीवकालिशं सुचत्तानूप्रतिसंयत्तन्नपान्युयोधपदाहवे एवंचित्रममभूद्युद्धं
तस्यतैः सहभारत उन्नायोल्लापचयथादेहिनामिंद्रियैर्विभो नराश्चैवनरैः सार्द्धंदंतिनोदंतिभिस्तथा हयाह
यैः समायुक्तारथिनोरथिभिस्तथा संकुलंचाभवद्युद्धंघोररूपंविशांपते इदंचित्रमिदंघोरमिदंरौद्रमिदं
प्रभो युद्धान्यासन्महाराजघोराणीचबहूनिच तेसमासाद्यसमरेपरस्परमरिंदमाः विव्यधुश्चैवजघ्नुश्च
समासाद्यमहाहवे तेषांश स्त्रसमुद्भूतंरजस्तीव्रमदृश्यत प्रवातेनोद्धतंराजन्धावद्भिश्चास्त्रसादिभिः
रथनेमिसमुद्भूतंनिश्वासैश्चापिदंतिनां रजः संध्याभ्रकपिलंदिवाकरपथंययौ रजसातेनसंपृक्ते भास्क
रेनिष्प्रभीकृते संछादिताभवद्भूमिस्तेचशूरामहारथाः मुहूर्तादिवसंवृत्तंनीरजस्कंसमंततः वीरशोणि
तसिक्तायांभूमौभरतसत्तम उपशाम्यत्ततत्तीव्रंतद्रजोघोरदर्शनं ततोपश्यन्महाराजद्वंद्वयुद्धानिभार
त यथाप्राग्र्यंयथाज्येष्ठंमध्याह्नेवैसुदारुणं वर्मणांतत्रराजेंद्रव्यदृश्यंतोज्वलाःप्रभाः शब्दःसुतुमुलःसं
ख्येशराणांपततामभूत् महावेणुवनस्येवदह्यमानस्यसर्वशः महाभारतेशल्यपर्वणि संजयउवा
च वर्त्तमानेतथायुद्धेघोररूपेभयानके अभज्यततवबलंतत्रतवपुत्रस्यपांडवैः तांश्चयत्नेनमहता
संनिवार्यमहारथान् पुत्रास्तेयोधयामासुःपांडवानामनीकिनीं निवृत्ताः सहसायोधास्तवपुत्रप्रियैषिणः

संनिवृत्तेषुतेष्वेवंयुद्धमासीत्सुदारुणं तावकानांपरेषांचदेवासुररणोपमं परेषांतवसैन्येवानासीत्काश्चित्पराङ्मु
खः अनुमानेनयुध्यंतेसंज्ञाभिश्चपरस्परं तेषांक्षयोमहानासीद्युध्यतामितरेतरं ततोयुधिष्ठिरोराजाक्रोधेन
महतायुतः जिगीषमाणःसंग्रामेधार्त्तराष्ट्रान्सराजकान् त्रिभिःशारद्वतंविध्वारुक्मपुंखैःशिलाशितैः
चतुर्भिर्न्निजघानाश्वान्नाराचैःकृतवर्मणः अश्वत्थामातुहार्दिक्यमपोवाहयशस्विनं अथशार
द्वतोष्टाभिःप्रत्यविध्यद्युधिष्ठिरं ततोदुर्योधनोराजारथान्सप्तशतान्रणे प्रेषयद्यत्रराजावैधर्मपुत्रोयुधि
ष्ठिरः तेरथारथिभिर्युक्तामनोमारुतरंहसः अभ्यद्रवंतसंग्रामेकौंतेयस्यरथंप्रति तेसमंतान्महाराजप
रिवार्ययुधिष्ठिरं अदृश्यंसायकैश्चक्रुर्मेघाइवदिवाकरं तेदृष्ट्वाधर्मराजानंकौरवैस्तैस्तथाकृतं नामृष्यंत
सुसंरब्धाःशिखंडिप्रमुखारथाः रथैरग्निजवैर्युक्तैःकिंकिणीजालसंवृतैः आजग्मुरभिरक्षंतःकुंतीपुत्रंयु
धिष्ठिरं ततःप्रववृतेरौद्रःसंग्रामःशोणितोदकः पांडवानांकुरूणांचयमराष्ट्रविवर्द्धनः रथान्सप्तशतान्हृ
त्वाकुरूणामाततायिनां पांडवाःसहपांचालैःपुनरेवाभ्यवारयन् तत्रयुद्धंमहच्चासीत्तवपुत्रस्यपांडवैः
नचनस्तादृशंदृष्टंनैवचापिपरिश्रुतं वर्त्तमानेतथायुद्धेनिर्मर्यादेसमंततः वध्यमानेषुयोधेषुतावके
ष्वितरेषुच निनदत्सुचयोधेषुशंखवर्यैश्चपूरितैः उत्क्रुष्टैःसिंहनादैश्चगर्जितेनचधन्विनां अति

श्रीराम०

षु देहेषु च्छिद्यमानेषु मर्मसु धावमानेषु योधेषु जयगृद्धिषु मारिष संहारे सर्वतो जाते पृथिव्यां शोकसंभवे बह्वीनामुत्तमस्त्रीणां सीमंतोद्धरणे तदा
निर्मर्यादे ततो युद्धे वर्त्तमाने सुदारुणे प्रादुरासन्विनाशाय तदोत्पाताः सुदारुणाः चचाल शब्दं कुर्वाणा सपर्वतवना मही सदंडाः सोल्मुका राज
न्कीर्यमाणाः समंततः उल्काः पेतुर्दिवो भूमावाहत्य रविमंडलं विष्वग्वाताः प्रादुरासन्नीचैः शर्करकर्षणाः अश्रूणि मुमुचुर्नागा वेपथुश्चाभव
द्भृशं एतान्घोराननादृत्य समुत्पातान्सुदारुणान् पुनर्युद्धाय संमंत्र्य क्षत्रियास्तस्थुरव्यथाः रमणीये कुरुक्षेत्रे पुण्ये स्वर्गं यियासवः ततो गांधार
राजस्य पुत्रः शकुनिरब्रवीत् युध्यध्वमग्रतो यावत् पृष्ठतो हन्मि पांडवान् ततो नः संप्रयातानां मद्रयोधास्तरस्विनः हृष्टाः किलकिलाशब्दमकुर्व
न्तापरे तथा अस्मांस्तु पुनरासाद्य लब्धलक्षा दुरासदाः शरासनानि धुन्वंतः शरवर्षैरवाकिरन् ततो हतेषु वै राजन्मद्रराजबले तदा दुर्योधनबलं दृष्ट्वा
पुनरासीत्पराङ्मुखं गांधारराजस्तु पुनर्वाक्यमाह ततो बली निवर्तध्वमधर्मज्ञा युध्यध्वं किं सृतेन वः अनीकं दशसाहस्रमश्वानां भरतर्षभ आसीद्गांधा
रराजस्य विमलप्रासयोधिनां बलेन तेन विक्रम्य वर्तमाने जनक्षये पृष्ठतः पांडवानीकमभ्यघ्नन्निशितैः शरैः तदभ्रमिव वातेन क्षिप्यमाणं समं
ततः अभज्यत महाराज पांडूनां सुमहद्बलं ततो युधिष्ठिरः प्रेक्ष्य भग्नं स्वबलमंतिकात् अभ्यचोदयदव्यग्रः सहदेवं महाबलं असौ सुबलपुत्रो नो जघनं
पीड्य संस्थितः सेनां निशूदयत्येष पश्य पांडव दुर्मतिः गच्छ त्वं द्रौपदेयाश्च शकुनिं सौबलं जहि रथानीकमहं धक्ष्ये पांचालसहितोनघ गच्छंतु कुंजरा
: सर्वे वाजिनश्च सह त्वया पादाताश्च त्रिसाहस्राः शकुनिं तैर्वृतो जहि ततो गजाः सप्तशताश्चापपाणिभिराहताः पंच चाश्वसहस्राणि सहदेवश्च
पांडवान् पादाताश्च त्रिसाहस्रा द्रौपदेयाश्च सर्वशः रणेह्यभ्यद्रवंस्तं शकुनिं युद्धदुर्मदं ततस्तु सौबलो राजन्नभ्यतिक्रम्य पांडवान् जघान पृष्ठतः

सेनांजयपरीप्सवः प्रत्तायवान् अश्वारोहास्तुसंरब्धाः पांडवानांतरस्विनः प्राविशन्सौवलानीकमभ्यतिक्रम्यतान्रथान् तेतत्रासादिनः शूराः
सौवलस्यमहद्बलं गजमध्येवतिष्ठंतः शरवर्षैरवाकिरन् तदुद्यतगदाप्रासमहापुरुषसेवितं प्रावर्त्ततमहद्युद्धंराजन्दुर्मंत्रितेतव उपारमंत
ज्याशब्दाः प्रेक्षकारथिनोभवन् नहिस्वेषांपरेषांवाविशेषः प्रत्यदृश्यत शूरवाहुविसृष्टानांशक्तीनांभरतर्षभ ज्योतिषामिवसंपातमपश्यन्
कुरुपांडवाः ऋष्टिभिर्विमलाभिश्चतत्रतत्रविशांपते संपतंतीभिराकाशमावृतंवह्वशोभत प्रासानांपततांचैवरूपमासीत्समंततः श
लभानामिवाकाशेतदाभरतसत्तम रुधिरोक्षितसर्वांगाविप्रविद्धैर्नियंतृभिः हयाः परिपतंतिस्मशतशोथसहस्रशः अन्योन्यंसंनिविष्टाश्च
समासाद्यपरस्परं अविक्षताःस्मदृश्यंतेवमंतोरुधिरंमुखैः ततोभवत्तमोघोरंसैन्येवरजसावृते तानप क्रमतोद्राक्षंतस्माद्देशादरिंदमान्
ग७ अश्वान्राजन्मनुष्यांश्चतमसासंवृतेसति भूमौनिपतिताश्चान्येवमंतोरुधिरंवहु केशाकेशिसमालग्नानाशेकुश्चेष्टितुंनराः अन्योन्यमश्वपृष्ठेभ्यो
विकर्षंतोमहावलाः मल्लाइवसमासाद्यनिजघ्नुरितरेतरं अश्वैश्चव्यपकृष्यंतवहवोत्रगतासवः भूमौनिपतिताश्चान्येवहवोविजयैषिणः तत्रतत्र
व्यदृश्यंतपुरुषाः शूरमानिनः रक्तोक्षितैश्छिन्नभुजैरवकृष्टशिरोरुहैः व्यदृश्यतमहीकीर्णाशतशोथसहस्रशः दूरंनशक्यंतत्रासीद्गंतुम
श्वेनकेनचित् हस्त्यारोहै तैरश्वैरावृतेवसुधातले रुधिरोक्षितसंनाहैरात्तशस्त्रैरुदायुधैः नानाप्रहरणैर्घोरैः परस्परवधैषिभिः सुसंनिकृष्टैः
संग्रामेहतभूयिष्ठसैनिकैः समुहूर्त्तंततोयुद्ध्वासौवलोथविशांपतेषट्सहस्रैर्हयैः शिष्टैरपायाच्छकुनिस्ततः तथैवपांडवानीकंरुधिरेणसमु
क्षितं षट्सहस्रैर्हयैः शिष्टैरपायाच्छ्रांतवाहनं अश्वारोहास्तुपांडूनामब्रुवन्रुधिरोक्षिताः सुसंनिकृष्टाः संग्रामेभू पिष्टंत्यक्तजीविताः राम०

हि

नेहशक्यंरथैर्योद्धुंकुंजरैवमहागजैः रथानेवरथायांतुकुंजराःकुंजरानपि प्रतियातोहिशकुनिःस्वमनीकमवस्थितः पुनःसौवलोराजायुद्धमस्मा
गमिष्यति ततस्तद्द्रौपदेयाश्चते[illegible]चमत्तामहाद्विपाः प्रययुर्यत्रपांचाल्योधृष्टद्युम्नोमहारथः सहदेवोपिकौरव्योरजोमेघसमुच्छ्रिते। एकाकीप्र
ययौतत्रराजायुधिष्ठिरः ततस्तेषुप्रयातेषुशकुनिःसौवलःपुनः पार्श्वतोभ्याहनत्क्रुद्धोधृष्टद्युम्नस्यवाहिनीं ततःपुनस्तुमुलंयुद्धंप्राणांस्त्यक्त्वाभ्यव
र्त्तत तावकानांपरेषांचपरस्परवधैषिणां तेन्योन्यममवेक्षंततस्मिन्वीरसमागमे योधाःपर्यपतन्राजन्शतशोथसहस्रशः असिभिश्छिद्य
मानानांशिरसांलोकसंक्षये प्रादुरासीन्महाञ्छब्दस्तालानांपततामिव विमुक्तानांशरीराणांभिन्ना[illegible]नांपततांभुवि। सायुधानांचवाहूनामु
रूणांचविशांपते। आसीद्घटचटाशब्दःसुमहाल्लोमहर्षणः निघ्नंतोनिशितैःश[illegible]भ्रातॄन्पुत्रान्पितॄनपि योधाःपरियंतिस्मयथामिषकृतेखगाः
अन्योन्यंप्रतिसंरब्धाःसमासाद्यपरस्परं अहंपूर्वमहंपूर्वमितिन्यघ्नन्सहस्रशः संघातैरासनभ्रष्टैरश्वारोहैर्गतासुभिः हयाःपरियंतिस्मशतशो
थसहस्रशः स्फुरतांप्रतिपिष्टानामश्वानांशीघ्रचारिणां स्तनतांचमनुष्याणांसन्नद्धानांविशांपते शक्त्यृष्टिप्रासशब्दश्चतुमुलः समजायत भि
दतांपरमर्माणिराजन्दुर्मंत्रितेतव श्रमाभिभूताःसंरब्धाःश्रांतवाहाःपिपासिताः विक्षताश्चशितैःशस्त्रैरभ्यवर्त्तंततावकाः मत्ताःरुधिरगंधेन
बहवोत्रविचेतसः जघ्नुःपरान्स्वकांश्चैवप्राप्तान्[illegible]प्रासानतेनरान् बहवश्चगतप्राणाःक्षत्रियाजयगृद्धिनः भूमावभ्यपतन्राजन्श
रवृष्टिभिराहताः पृथक्गृध्रशृगालानांतुमुलेमोदनेहनि आसीद्बलक्षयोघोरस्तवपुत्रस्यपश्यतः नराश्वकायसंछन्नाभूमिरासीद्विशांपते
रुधिरोदकचित्राचभी[illegible]रूणांभयवर्द्धिनी असिभिःपट्टिशैःशूलैस्तक्ष्माणाःपुनःपुनः तावकाःपांडवेयाश्चनाभ्यवर्त्तंतभारत प्रहरंतोयथा

शै ५

शं०
३६

शक्तिपातस्माराणासधाराणां योधाः परिपतंतिस्मसमंततोरुधिरोक्षिताः ।शिरोपगृह्णीत्वाकेशेषुकबंधश्चक्षहस्तउद्यम्यचाशितंखड्गंरुधिरेणपरिप्लुतं
अथोच्छ्रितेषुबहुषुकबंधेषुजनाधिप तथारुधिरगंधेनयोधाःकश्मलमाविशन् मंदीभूतेततःशब्देपांडवानांमहद्बले अल्पावशिष्टै
स्तुरगैरभ्यवर्त्ततसौबलः ततोभ्यधावंस्त्वरिताःपांडवाजयगृद्धिनः पदातयश्चनागाश्चसादिनश्चोद्यतायुधाः कोष्ठकीकृत्यचाप्येनंपरिक्षिप्य
चसर्वशः सशस्त्रैर्नानाविधैर्जघ्नुर्युद्धपारंतितीर्षवः त्वदीयास्तांस्तुसंप्रेक्ष्यसर्वतःसमभिद्रुतान् साश्वपत्तिद्विपरथाःपांडवानभिदुद्रुवुः केचित्प
दातयःपद्भिर्मुष्टिभिश्चपरस्परं निजघ्नुःसमरेशूराःक्षीणशस्त्रास्ततोयतन् रथेभ्योरथिनःपेतुर्द्विपेभ्योहस्तिसादिनः विमानेभ्योदिवोभ्र
ष्टाःसिद्धाःपुण्यक्षयाद्यथा एवमन्योन्यमायस्तायोधाजघ्नुर्महामृधे पितॄन्भ्रातॄन्वयस्यांश्चपुत्रानपितथापरे एवमासीदमर्यादंयुद्ध
भरतसत्तम प्रासासिबाणकलिलेवर्त्तमानेसुदारुणे महाभारतेशल्यपर्वणि संजयउवाच तस्मिन्शब्देमृदौजातेपांडवैर्निहतेबले
अश्वैःसप्तशतैःशिष्टैरुपावर्त्ततसौबलः सयात्वावाहिनींतूर्णमब्रवीत्त्वरयन्युधि युध्यध्वमितिसंहृष्टाःपुनःपुनररिंदमान् अपृच्छत्
क्षत्रियांस्तत्रक्वनुराजामहारथः शकुनेस्तुवचःश्रुत्वातऊचुर्भरतर्षभ असौतिष्ठतिकौरव्योरणमध्येमहारथः यत्रैतत्सुमहच्छत्रंपूर्णचं
द्रसमप्रभं यत्रैतेसतलत्राणारथास्तिष्ठंतिदंशिताः यत्रैषशब्दस्तुमुलःपर्जन्यनिनदोपमः तत्रगच्छद्रुतंराजंस्ततोद्रक्ष्यसिकौरवं एवमु
क्तस्तैःशूरैःशकुनिःसौबलस्तदा प्रययौतत्रयत्रासौपुत्रस्तवनराधिप सर्वतःसंवृतोवीरैःसमरेष्वनिवर्त्तिभिः ततोदुर्योधनंदृष्ट्वारथा
नीकेव्यवस्थितं सरथांस्तावकान्सर्वान्हर्षयन्शकुनिस्ततः दुर्योधनमिदंवाक्यंहृष्टरूपोविशांपते कृतकार्यमिवात्मानंमन्यमानो नृपं०

सो२ शि२

३६

प्रवीन्मयं जहि एतन्नस्थानीकान्मा सर्वे जितामया नान्यस्मान्नीवितं संख्येशक्यो जेतुं युधिष्ठिरः हतेतस्मिन्नस्थानीके पांडवेनाभिपालिते गजानेता
न्नहनिष्यामः पदातींश्चेतरांस्तथा श्रुत्वातद्वचनंतस्यतावकानांमयग्रहिनः जवेनाभ्यतन्हृष्टाः पांडवानामनीकिनीं सर्वे विक्षततूणीराः प्रगृहीतशरासनाः श
रासनानिधुन्वानाः सिंहनादंप्रचक्रिरे ततोऽस्मातन्निर्घोषः पुनरासीद्विशांपते प्रादुरासीच्छराणांचसमुक्तानांतवारुणाः तान्समीपगतान्दृष्ट्वाजवेनो
द्यतकार्मुकान् उवाचदेवकीपुत्रंकुंतीपुत्रोधनंजयः चोदयाश्वानसंभ्रांतः प्रविशैनंवलार्णवं अंतमद्यगमिष्यामिशत्रूणांनिशितैः शरैः अष्टादश
दिनान्यद्ययुद्धस्यास्यजनार्दन वर्त्तमानस्यमहतः समासाद्यपरस्परं अनंतकल्पाध्वजिनीभूत्वाह्येषांमहात्मनां क्षयमद्यगतायुद्धेपश्यदैवंयथाविधं
समुद्रकल्पंतुवलंधार्त्तराष्ट्रस्यमाधव अस्मानासाद्यसंजातंगोष्पदोपममच्युतहते भीष्मेतसंदध्याच्छिवंस्याद्यदि माधव नचतत्कृतवान्मूढोधार्त्तराष्ट्रः

गा५ प८

सवालिशः उक्तंभीष्मेणयद्वाक्यंहितंपथ्यंचमाधव तच्चापिनासौकृतवान्वीतबुद्धिः सुयोधनः तस्मिंस्तुतमुलेभीष्मेप्रच्युतेपृथिवीतले नजानेका
रणंकिंतुयेनयुद्धमवर्त्तत मूढांस्तुसर्वथामन्येधार्त्तराष्ट्रान्सुवालिशान् पतितेशांतनोः पुत्रेयेकार्षुः संयुगंपुनः अनंतरंचनिहतेद्रोणेब्रह्मविदांवरे
राधेयेचविकर्णेचनैवाशाम्यतवैशसं अल्पावशिष्टेसैन्येस्मिन्सूतपुत्रेचपातिते सपुत्रेवैनरव्याघ्रेनैवाशाम्यतवैशसं श्रुतायुषिहतेवीरेजल
संधेचपौरवे श्रुतायुधेचनृपतौनैवाशाम्यतवैशसं भूरिश्रवसिशल्येचशाल्वेचैवजनार्दन आवंत्येषुचवीरेषुनैवाशाम्यतवैशसं जयद्रथेचनिहतेरा
क्षसेचाप्यलायुधे वाल्हिकेसोमदत्तेचनैवाशाम्यतवैशसं भगदत्तेहतेशूरेकांबोजेचसुदक्षिणे दुःशासनेचनिहतेनैवाशाम्यतवैशसं दृष्ट्वाचनिह
तान्शूरान्पृथक्मांडलिकान्नृपान् वलिनश्चरणेकृष्णनैवाशाम्यतवैशसं अक्षौहिणीपतीन्दृष्ट्वाभीमसेनेनपातितान् मोहाद्वायदिवालोभान्ने

श
३१

वाशाम्यतवैशसं कोनुराज्ञाकुलेजातः कौरवेयोविशेषतः निरर्थकंमहद्वैरंकुर्यादन्यः सुयोधनात् गुणातोभ्यधिकंज्ञात्वाबलतः शोर्यतोपि
वा अमूढः कोनुयुध्येतनानन्यप्राज्ञोहिताहितं यत्तत्तस्यमनोत्यासीत्त्वयोक्तस्यहितंवचः प्रशमेपांडवैः सार्द्धंसोन्यस्यश्रृणुयात्कथं येनशां
तनवोभीष्मोद्रोणोविदुरस्तथैव प्रत्याख्याताः शमस्यार्थे किंनुतस्यौषधंमतं मोघायेनपिताहृद्वः प्रत्याख्यातोजनार्दन तथामाताहितं
वाक्यंभाषमाणाहितैषिणी प्रत्याख्याताप्यस[illegible]क्तस्यसकस्माद्रोचयेद्वचः कुलांतकरणोव्यक्तंजातएषजनार्दन तथास्यदृश्यतेचेष्टानीति
श्चैवविशांपते नैषदास्यतिनोराज्यमितिमेमतिरच्युत उक्तोहिबहुशस्तातविदुरेणमहात्मना नजीवन्दास्यतेभागंधार्त्तराष्ट्रः कथंचन यावत्प्रा
णान्धारयतिध्रुवंपापोपिमानद तावद्युष्मास्वपापेषोनोविचरिष्यतिपातकं नचशक्योमयाजेतुमृतेयुद्धेनमाधव इत्यब्रवीत्सदामांहिवि
दुरः सत्यदर्शन तत्सर्वमद्यजानामिव्यवसायंदुरात्मनः यदुक्तंवचनंतेनविदुरेणमहात्मना। योहिश्रुत्वावचः पथ्यंजामदग्न्याद्यथातथं ना
भ्यमन्यतदुर्बुद्धिर्ध्रुवंनाशमुखेस्थितः उक्तंहिबहुभिः सिद्धैर्जातमात्रेसुयोधने एनंप्राप्यदुरात्मानंक्षयंक्षत्रंगमिष्यति तदिदंवचनंतेषांनिरु
क्तंवैजनार्दन क्षयंयाताहिराजानोदुर्योधनकृतेभृशं सोद्यसर्वान्रणेयोधान्निहनिष्यामिमाधव क्षत्रियेषुहतेष्वाशुशून्येचशिविरेकृते व
धायचात्मनोस्माभिः संयुगंरोचयिष्यति तदंतंहिभवेद्वैरमनुमानेनमाधव एवंपश्यामिवार्ष्णेयचिंतयन्प्रज्ञयास्वया विदुरस्यचवाक्येनचे
ष्टयाचदुरात्मनः संयाहिभारतींवीरयावद्धन्मिशितैः शरैः दुर्योधनंदुरात्मानंवाहिनींचास्यसंयुगे क्षेममद्यकरिष्यामिधर्मराजस्यमाधव ह
त्वैतदुर्बलंसैन्यंधार्त्तराष्ट्रस्यपश्यतः संजयउवाच अभीषुहस्तोदाशार्हस्तथोक्तः सव्यसाचिना तद्बलौघममित्राणामभीतः प्राविशद्रणे

राम०
३१

शरासनवलं घोरं शक्तिकंटकसंहतं गदापरिघपंथानं ध्वजनागमहाद्रुमं हयपत्तिलताकीर्णं गाहमानो महायशाः व्यचरत्तत्र गोविंदो रथेनातिपताकि
ना ते हयाः पांडुरा राजन्वहंतोर्जुनमाहवे दिक्षु सर्वास्वदृश्यंत दाशार्हेण प्रचोदिताः ततः प्रायाद्रथेनाजौ सव्यसाची परंतपः किरंछरशतांस्ती
क्ष्णान्वारिधारा इवांबुदः प्रादुरासीन्महाञ्छब्दः शराणां नतपर्वणां इषुभिश्छाद्यमानानां समरे सव्यसाचिना असज्जंतस्तनुत्रेषु शरौघाः प्रापतन्भु
वि इंद्राशनिसमस्पर्शा गांडीवप्रेषिताः शराः नरान्नागान्समाहत्य हयांश्चापि विशांपते अपतंत रणे वाणाः पतंगा इव घोषिणः आसीत्सर्वमव
च्छिन्नं गांडीवप्रेषितैः शरैः न प्राज्ञायंत समरे दिशो वा विदिशोपि वा सर्वमासीज्जगत्पूर्णं पार्थनामांकितैः शरैः रुक्मपुंखैस्तैलधौतैः कर्मा
रपरिमार्जितैः ते दह्यमानाः पार्थेन पावकेनेव कुंजराः समासीदंत कौरव्या वध्यमानाः शितैः शरैः शरचापधरः पार्थः प्रज्वलन्निव भारत ददा
ह समरे योधान्कक्षमग्निरिव ज्वलन् यथा वनांते वनपैर्विसृष्टः कक्षं दहेत्कृष्णगतिः सघोषः भूरिद्रुमं शुष्कलतावितानं भृशं समृद्धो ज्वलनः प्र
तापी एवं स नाराचगणप्रतापी शरार्चिरुच्चावचतिग्मतेजाः ददाह सर्वां तव पुत्रसेनाममृष्यमाणस्तरसा तरस्वी तस्येषवः प्राणहराः सुमुक्ता ना
सज्जन्वर्मसु रुक्मपुंखाः न च द्वितीयं प्रमुमोच वाणं नरे हये वा परमद्विपे वा अनेकरूपाकृतिभिर्हि वाणैर्महारथानीकमनुप्रविश्य स एव
एकस्तव पुत्रसेनां जघान दैत्यानिव वज्रपाणिः ॥ ॥ महाभारते शल्यपर्वणि ॥ ॥ संजय उवाच ॥ ॥ अस्यतां यतमानानां शूराणामनि
वर्तिनां संकल्पमकरोन्मोघं गांडीवेन धनंजयः इंद्राशनिसमस्पर्शानविषह्यान्महौजसः विसृजन्दृश्यते वाणान्धारा मुंचन्निवांबुदः तत्सैन्यं
भरतश्रेष्ठ वध्यमानं किरीटिना संप्रदुद्राव संग्रामात्तव पुत्रस्य पश्यतः हतधुर्या रथाः केचिद्धतसूतास्तथापरे भग्नाक्षयुगचक्राश्चाः केचिदा

म २

श० ३८

प्रविशांपते अमेषां नायकाः कीर्णास्तथा मेशरपीडिताः अकृताः पुरायस्य केचित्प्राद्रवन्भयपीडिताः केचित्तत्रानुपार्षोहत भूपिष्टवाहनाः विमुक्तमु
पितृनन्ये महायानमपरे पुनः बांधवांश्च नरव्याघ्रभ्रातॄन्संबंधिनस्तथा दुद्रुवुः केचिदुत्सृज्य तत्र तत्र विशांपते बहवोत्र भृशं विह्वलाः सममानामहारथाः नि
हन्यंतः स्म दृश्यंते पार्थबाणाहता नराः तानन्ये रथमारोप्य आश्वास्य मुहूर्तकं विश्रान्ताश्च वितृष्णाश्च पुनर्युद्धाय जग्मिरे तानपास्य गताः केचि
त्पुनरेव युयुत्सवः कुर्वंतस्तव पुत्रस्य शासनं युद्धदुर्म्मदाः पानीयमपरे पीत्वा पर्याश्वास्य च वाहनं वर्माणि च समारोप्य केचिद्भरतसत्तम समाश्वा
स्यापरे भ्रातॄन्निक्षिप्य शिविरेपि च पुत्रानन्ये पितॄनन्ये पुनर्युद्धमरोचयन् सज्जयित्वा रथान्केचिद्यथामुख्यं विशांपते आप्लुत्य पांडवानीकं पुन
र्युद्धमरोचयन् ते शूराः किंकिणीजालैः समाछन्ना बभासिरे त्रैलोक्यविजये युक्ता यथा दैतेयदानवाः आगम्य सहसा केचिद्रथैः स्वर्णविभूषितैः
पांडवानामनीकेषु धृष्टद्युम्नमयोधयन् धृष्टद्युम्नोपि पांचाल्यः शिखंडी च महारथः नाकुलिश्च शतानीको रथानीकमयोधयन् पांचाल्यस्तु ततः
क्रुद्धः सैन्येन महता वृतः अभ्यद्रवत्सुसंरब्धस्तावकान्हन्तुमुद्यतः ततस्त्वापततस्तस्य तव पुत्रो जनाधिप बाणसंघाननेकान्वै प्रेषयामास भारत धृ
ष्टद्युम्नस्ततो राजंस्तव पुत्रेण धन्विना नाराचैर्बहुभिः क्षिप्रं बाह्वोरुरसि चार्पितः सोतिविद्धो महेष्वासस्तोत्रार्दित इव द्विपः तस्याश्वांश्चतुरो बाणैः
प्रेषयामास मृत्यवे सारथेश्चास्य भल्लेन शिरः कायादपाहरत् ततो दुर्योधनो राजा पृष्ठमारुह्य वाजिनः अपाक्रामद्धतरथो नातिदूरमरिंदम दृष्ट्वा
तु हतविक्रांतं स्वमनीकं महाबलः तव पुत्रो महाराज प्रययौ यत्र सौबलः ततो रथेषु भग्नेषु त्रिसाहस्रा महाद्विपाः पांडवान्रथिनः पंच समंतात्पर्यवा
रयन् ते वृताः समरे पंच गजानीकेन भारत अशोभंत नरव्याघ्रा ग्रहा व्याप्ता घनैरिव ततोर्जुनो महाराज लब्धलक्षो महाभुजः विनिर्ययौ रथेनैव श्वे

चिद्र५

एम०

तस्य३ ३८

ना सृ२ प२

ताश्वैः कृतसमारथिभिस्तैः समंतात्परिवृतः कुंजरैः पर्वतोपमैः नाराचैर्विमलैस्तीक्ष्णैर्गजानीकमयोधयत तत्रैकबाणा निहतानपश्याममहागजान्
पतितान्पात्यमानांश्च निर्भिन्नान्सव्यसाचिना भीमसेनस्तु तान्दृष्ट्वा नागान्नगगजोपमः करेणादाय महतीं गदामभ्यपतद्बली अथाप्लुत्य रथात्तूर्णं दंडपाणिरि
वांतकः तमुद्यतगदं दृष्ट्वा पांडवानां महारथं वित्रेसुस्तावकाः सैन्याः शकृन्मूत्रं प्रसुस्रुवुः आविग्नं च बलं सर्वं गदाहस्ते वृकोदरे गदया भीमसे
नेन भिन्नकुंभान्रजस्वलान् धावमानानपश्याम कुंजरान्पर्वतोपमान प्राधावन्कुंजरास्ते तु भीमसेनगदाहताः पेतुरार्त्तस्वरं कृत्वा छिन्नपक्षा इवा
द्रयः तान्भिन्नकुंभान्सुबहून्द्रवमाणानितस्ततः पतमानांश्च संप्रेक्ष्य वित्रेसुस्तव सैनिकाः युधिष्ठिरोपि संक्रुद्धो माद्रीपुत्रौ च पांडवौ गार्ध्रपत्रैः शितैर्बा
णैर्जघ्नुर्वै गजयोधिनः धृष्टद्युम्नस्तु समरे पराजित्य नराधिपं अपक्रांते तथा तस्मिन्हयपृष्ठं समाश्रिते दृष्ट्वा च पांडवान्सर्वान्कुंजरैः परिवारितान धृष्टद्यु
म्नो महाराज सह सर्वैः प्रभद्रकैः पुत्रः पंचालराजस्य जिघांसुः कुंजरान्ययौ अदृष्ट्वा तु रथानीके दुर्योधनमरिंदमं अश्वत्थामा कृपश्चैव कृतवर्म्मा
च शाश्वतः अपृच्छन्क्षत्रियांस्तत्र क्व नु दुर्योधनो गतः अपश्यमाना राजानं वर्त्तमाने जनक्षये मन्वाना निहतं तत्र तव पुत्रं महारथाः विषण्णवदना
भूत्वा पर्यपृच्छंत ते सुतं आहुः केचिद्धते सूते प्रयातो यत्र सौबलः हित्वा पांचालराजस्य तदनीकं दुरुत्सहं अपरे त्वब्रुवंस्तत्र क्षत्रिया भृशविक्षताः
दुर्योधनेन किं कार्यं द्रक्ष्यध्वं यदि जीवति युध्यध्वं सहिताः सर्वे किं नो राजा करिष्यति ते क्षत्रियाः क्षतैर्देहैर्हतभूयिष्ठवाहनाः शरैः संपीड्यमा
नास्तु नातिव्यक्तमिवाब्रुवन् इदं सर्वं बलं हन्मो येन स्म परिवारिताः एते सर्वे गजान्हत्वा उपयांति स्म पांडवाः श्रुत्वा तु वचनं तेषां अश्वत्थामा महाबलः
भित्वा पंचालराजस्य तदनीकं दुरासदं कृपश्च कृतवर्मा च प्रययुर्यत्र सौबलः रथानीकं परित्यज्य शूराः सुदृढधन्विनः ततस्तेषु प्रयातेषु धृष्टद्युम्न

१

स्थितः

स० ३८

पुरस्कृताः आययुः पांडवा राजन्विनिघ्नंतस्त्वदीयकान् दृष्ट्वा तु तानापततः संप्रहृष्टान्महारथान् पराक्रांतांस्तथा वीरान्निराशान्जीविते तदा
विवर्णमुखमभूद्भूयिष्ठमवक्षावकं बलं परिक्षीणान्बलान्दृष्ट्वा तानहं परिवारितान् राजन्बलेन द्व्यंगेन त्यक्त्वा जीवितमात्मनः आत्मना पंचमो यु
ध्येयं पांचालस्य बलेन ह तस्मिन्देशे व्यवस्थाप्य यत्र शारद्वतः संप्रयुद्धा वयं पंच किरीटिशरपीडिताः धृष्टद्युम्नः महानीकस्तत्र नो व्यहरद्रणो महान् जि
तास्तेन वयं सर्वे व्यपयाम रणात्ततः अथापश्यं सात्यकिं तमुपायांतं महारथं रथैश्चतुःशतैर्वीरो मां चाभ्यद्रवदाहवे धृष्टद्युम्नादहं मुक्तः कथंचिच्छ्रां
तवाहनात् पतितं माधवानीकं दुष्कृती नरकं यथा तत्र युद्धमभूद्घोरं मुहूर्तमतिदारुणं सात्यकिस्तु महाबाहुर्मम हत्वा परिच्छदं जीवग्राहम
मां ग्रहीन्[illegible] मूर्छितं पतितं भुवि ततो मुहूर्तादिव तद्गजानीकमवध्यत गदया भीमसेनेन नाराचैरर्जुनेन च अतिपिष्टैर्महानागैः समंतात्पर्वतो
पमैः नातिप्रसिद्धेव गतिः पांडवानामजायत रथमार्गस्ततश्चक्रे भीमसेनो महाबलः पांडवानां महाराज व्यपकर्षन्महागजान् अश्वत्थामा कृ
पश्चैव कृतवर्मा च सात्वतः अपश्यंतो रथानीके दुर्योधनमरिंदम राजानं मृगयामासुस्तव पुत्रं महारथं परित्यज्य च पांचालान्प्रयाता यत्र सौबलः
राज्ञोऽदर्शनसंविग्ना वर्तमाने जनक्षये इति श्रीमहाभारते शल्यपर्वणि संजय उवाच गजानीके हते तस्मिन्पांडुपुत्रेण भारत वध्यमाने बले चैव
भीमसेनेन संयुगे चरंतं च तथा दृष्ट्वा भीमसेनमरिंदमं दंडहस्तं यथा क्रुद्धमंतकं प्राणहारिणं समेत्य समरे राजन्हतशेषाः सुतास्तव अदृश्यमा
ने कौरव्ये पुत्रे दुर्योधने तथा सोदर्याः सहिता भूत्वा भीमसेनमभिद्रवन् दुर्मर्षणः श्रुतांतश्च जैत्रो भूरिबलो रविः जयसेनः सुजातश्च तथा दु
र्विषहोऽरिहा दुर्विमोचननामा च दुष्प्रधर्षस्तथैव च श्रुतर्वा च महाबाहुः सर्वे युद्धविशारदाः इत्येते सहिता भूत्वा तव पुत्राः समंततः भीमसेनमभिद्र

शल्य० ३८

दुमस्तरुधुः सर्वतोदिशं ततोभीमोमहाराजस्वरथंपुनरास्थितः मुमोचनिशितान्वाणान्पुत्राणांतवमर्मसु तेकीर्यमाणाभीमेनपुत्रास्तवमहारणे भी
मसेनमपासेधन्प्रवणादिवकुंजरं ततःक्रुद्धोरणेभीमः शिरोदुर्मर्षणस्यह क्षुरप्रेण प्रमथ्याशुपातयामासभूतले ततोपरेणभल्लेनसर्वाभरणभेदिना
श्रुतांतमवधीद्भीमस्तवपुत्रंमहारथं जयसेनंततोविद्धानाराचेनहसन्निव पातयामासकौरव्यंरथोपस्थादरिंदमः सपपातरथात्तूर्णंभूमौराजन्ममार
च श्रुतर्वातिततोभीमंक्रुद्धोविव्याधमेलतः शतेनगार्ध्रपत्राणांशराणांनतपर्वणां ततःक्रुद्धोरणेभीमोजैत्रंभूरिबलंरविं त्रीनेताह्निभिरानर्छद्विषाग्नि
प्रतिमैः शरैः तेहतान्यपतन्भूमौस्यंदनेभ्योमहारथाः वसंतेपुष्पशवलानिकृत्ताइवकिंशुकाः ततोपरेणभल्लेननाराचेनपरंतप दुर्विमोचनमाहत्यप्रे
षयामासमृत्यवे सहतःप्रापतद्भूमौस्वरथाद्रथिनांवरः गिरेस्तुकुटजोभग्नोमारुतेनेवपादपः दुष्प्रधर्षंततश्चैवसुजातंचसुतौतव एकैकंन्यवधीत्संख्ये
द्वाभ्यांद्वाभ्यांचमूमुखे तौशिलीमुखविद्धांगौपेततूरथसत्तमौ ततःपतंतमपरमभि वीक्ष्यसुतंतव भल्लेनयुधिविव्याधभीमोदुर्विषहंरणे सपपात
हतोवाहात्पश्यतांसर्वधन्विनां दृष्ट्वातुनिहतान्भ्रातृनेकेनबहूनेकेनसंयुगे अमर्षवशमापन्नःश्रुतर्वाभीममभ्ययात् विक्षिपन्सुमहच्चापंकार्तस्वरवि
भूषितं विसृजन्सायकांश्चैवविषाग्निप्रतिमान्बहून्
सतुराजन्धनुश्छित्वापांडवस्यमहामृधे अथैनंछिन्नधन्वानंविंशत्यासमवाकिरत् ततोन्यद्धनुरादायभीमसेनो
महारथः अवाकिरत्तवसुतंतिष्ठतिष्ठेतिचाब्रवीत् महदासीत्तयोर्युद्धंचित्ररूपंभयानकं यादृशंसमरेपूर्वंजंभवासवयोर्विभो तयोस्तत्रशितैर्मुक्तैर्यमदं ६५
निभैः शरैः समाच्छन्नाधरासर्वाखंचसर्वादिशस्तथा ततःश्रुतर्वासंक्रुद्धोधनुरादायसायकैः भीमसेनंरणेराजन्बाह्वोरुरसिचार्पयत् सोतिवि

तिष्ठ२

द्धो महाराज तव पुत्रेण धन्विना भीमः संचुक्रुधे क्रुद्धः पर्वणीव महोदधिः ततो भीमो रुषाविष्टः पुत्रस्तव मारिष सारथिं चतुरश्चान्वाहान्निन्ये यमक्षयं
विरथं तं समालक्ष्य विशिखैर्लोमवाहिभिः अवाकिरदमेयात्मा [illegible] र्शयन्पाणिलाघवं श्रुतर्वा विरथो राजन्नाजग्राह खड्गचर्मणी अथास्यद
तः खड्गं शतचंद्रं च भानुमत् क्षुरप्रेण शिरः कायात्पातयामास पांडवः छिन्नोत्तमांगस्य ततः क्षुरप्रेण महात्मनः पपात कायः स रथाद्वसुधा
मनुनादयन् तस्मिन्निपतिते वीरे तावका भयमोहिताः अभ्यद्रवंत संग्रामे भीमसेनं युयुत्सवः तानापतत एवाशु हतशेषाद्बलार्णवात् दंशितः प्र
तिजग्राह भीमसेनः प्रतापवान् ते तु तं वै समासाद्य परिवव्रुः समंततः ततस्तु संवृतो भीमस्तावकैर्निशितैः शरैः पीडयामास तान्सर्वान्सहस्राक्ष इ
वासुरान् ततः पंचशतान्हत्वा सवरूथान्महारथान् जघान कुंजरानीकं पुनः सप्तशतं युधि हत्वा दश सहस्राणि पत्तीनां परमेषुभिः वाजिनां च
शतान्यष्टौ पांडवः स्म विराजते भीमसेनस्तु कौंतेयो हत्वा युद्धे सुतांस्तव मेने कृतार्थमात्मानं सफलं जन्म च प्रभो तं तथा युध्यमानं वै विनिघ्नंतं च
तावकाः ईक्षितुं नोत्सहंते स्म तव सैन्यानि मारिष विद्राव्य तु कुरून्सर्वांस्तांश्च हत्वा पदानुगान् दोर्भ्यां शब्दं ततश्चक्रे त्रासयानो महाद्विपान् हतभूयि
ष्ठयोधा तु तव सेना विशां पते किंचिच्छेषा महाराज कृपणाः समपद्यत॥ ॥महाभारते शल्यपर्वणि॥ ॥संजय उवाच दुर्योधनो महाराज
सुदर्शश्चापि ते सुतः हतशेषौ तदा संख्ये वाजिमध्ये व्यवस्थितौ ततो दुर्योधनं दृष्ट्वा वाजिमध्ये व्यवस्थितं उवाच देवकीपुत्रः कुंतीपुत्रं धनंजयं शत्रवो
हतभूयिष्ठा ज्ञातयः परिपालिताः गृहीत्वा संजयं चासौ निवृत्तः शिनिपुंगवः परिश्रांतश्च नकुलः सहदेवश्च भारत योधयित्वा रणे पापान्धार्तराष्ट्रान्महा
नुगान् सुयोधनमभित्यज्य त्रय एते व्यवस्थिताः कृपश्च कृतवर्मा च द्रौणिश्चैव महारथः असौ तिष्ठति पांचाल्यः श्रिया परमया युतः दुर्योधनबलं हं

त्वामहसर्वैः प्रभद्रकैः असौ दुर्योधनः पार्थ वाजिमध्ये व्यवस्थितः छत्रेण ध्रियमाणेन वाजिमध्ये मुहुर्मुहुः प्रतिव्यूह्य बलं सर्वं रणमध्ये व्यवस्थितं
एनं हत्वा शितैर्बाणैः कृतकृत्यो भविष्यसि गजानीकं हतं दृष्ट्वा त्वां च प्राप्तमरिंदम यावन्न विद्रवंत्येते तावज्जहि सुयोधनं यातु कश्चित्तु पांचाल्यं
[illegible] क्षिप्रमागम्यतामिति परिश्रांतबलस्तात नैष मुच्येत किल्बिषी तव हत्वा बलं सर्वं संग्रामे धृतराष्ट्रजः जितान्पांडुसुतान्मत्वा रूपं धारयते महत्
त् निहतं स्वबलं मत्वा पीडितं चापि पांडवैः ध्रुवमेष्यति संग्राममेव धीश्चैवात्मनो नृपः एवमुक्तः फाल्गुनस्तु कृष्णं वचनमब्रवीत् धृत[illegible]राष्ट्रसुताः सर्वे भीम
सेनेन मानद यावेतावास्थितौ कृष्ण तावद्धनं भविष्यतः हतो भीष्मो हतो द्रोणो हतो वैकर्तनस्तथा मद्रराजो हतः शल्यो हतः कृष्ण जयद्रथः हयाः पं
चशताः शिष्टाः शकुनेः सौबलस्य च रथानां च शते शिष्टे द्वे एव तु जनार्दन दंतिनां च शतं साग्रं त्रिसाहस्राः पदातयः अश्वत्थामा कृपश्चैव त्रिगर्ताधि
पतिस्तथा उलूकः शकुनिश्चैव कृतवर्मा च सात्वतः एतद्बलमभूच्छेषं धार्तराष्ट्रस्य माधव मोक्षो न खल्वस्ति कालाद्धि विद्यते भुवि केशव चित तथा विनिहते
सैन्ये पश्य दुर्योधनं स्थितं अद्याह्नि महाराजो हतामित्रो भविष्यति न हि मे मोक्ष्यते कश्चित्परेषामिति चिंतये ये त्वद्य समरं कृष्ण न हास्यंति रणोत्कटाः
तान्वै सर्वान्हनिष्यामि यद्यपि स्युरमानुषाः अद्य युद्धे सुसंक्रुद्धो दीर्घं राज्ञः प्रजागरं अपनेष्यामि गांधारं पातयित्वा शितैः शरैः निकृत्या वै दुराचारो या
नि रत्नानि सौबलः सभायामहरद्द्यूते पुनस्तान्याहराम्यहं अद्य ता अपि रोत्स्यंति सर्वा नागपुरस्त्रियः श्रुत्वा पतींश्च पुत्रांश्च पांडवैर्निहतान्मृधे समाप्त
मद्य वै कर्म सर्वं कृष्ण भविष्यति अद्य दुर्योधनो दीप्तां श्रियं प्राणांश्च मोक्ष्यति नापयाति भयात्कृष्ण संग्रामाद्यदि चेन्मम निहतं विद्धि वार्ष्णेय धार्तराष्ट्र
सुबालिशं मम चैतदशक्तं वै वाजिवृंदमरिंदम सोढुं ज्यातलनिर्घोषं याहि यावन्निहन्म्यहं एवमुक्तस्तु दाशार्हः पांडवेन यशस्विना अचोदयद्धयान्राजन्

शा०
८१

न्दुर्योधनबलंप्रति तदनीकमभिप्रेक्ष्यत्रयः सज्जामहारथाः भीमसेनोर्जुनश्चैवसहदेवश्चमारिषः प्रययुः सिंहनादेनदुर्योधनजिघांसया तान्वेक्ष्यसहिता
न्सर्वान्नक्तवेगोधृतकार्मुकः सौबलोभ्यद्रवत्क्रुद्धःपांडवानाततायिनः सुदर्शनस्तवसुतोभीमसेनंसमभ्ययात् सुशर्माशकुनिश्चैवयुयुधातेकिरीटिना सहदे
वंतवसुतोहयपृष्ठ[illegible]गतोभ्ययात् ततोहियत्नतः क्षिप्रंतवपुत्रोजनाधिप सहदेवस्तुप्रासेनशिरसिप्राहरद्भृशं सोपाविशद्रथोपस्थेतवपुत्रेणताडितः
रुधिरप्लुतसर्वांगश्चाशीविषइवश्वसन् प्रतिलभ्यततः संज्ञांसहदेवोविशांपते दुर्योधनंशरैस्तीक्ष्णैः संक्रुद्धः समवाकिरत् पार्थोपियुधि[illegible]विक्रम्य
कुंतीपुत्रोधनंजयः शूराणामश्वपृष्ठेभ्यः शिरांसिनिचकर्त्तह तदनीकंतदापार्थोव्यधमन्निशितैःशरैः पातयित्वाहयान्सर्वांस्त्रिगर्त्तानांरथान्ययौ ततस्ते
सहिताभूत्वात्रिगर्त्तानांमहारथाः अर्जुनंवासुदेवंचशरवर्षैरवाकिरन् सत्यकर्माणमाक्षिप्यक्षुरप्रेणमहायशाः ततोस्यस्यंदनस्येषांचिच्छेदपांडुनंदनः
शिलाशितेनचविभोक्षुरप्रेणमहायशाः शिरश्चिच्छेदप्रहसन्स्तप्तकुंडलभूषणं सत्येषुमथचादत्तयोधानांमिषतांततः यथासिंहोवनेराजन्मृगंपरि
बुभुक्षितः तंनिहत्यततःपार्थः सुशर्माणंत्रिभिः शरैः विद्ध्वातेनाहरत्सर्वांस्तथातान्रुक्मभूषितान् ततस्तुप्रत्वरन्पार्थोदीर्घकालंसुसंभृतं मुंचन्क्रो
धविषंतीक्ष्णंप्रस्थलाधिपतिंप्रति तमर्जुनः पृषत्कानांशतेनभरतर्षभ पूरयित्वाततोवाहानहनत्तस्यधन्विनः ततः शरंसमाधाययमदंडोपमंशितं सुश
र्माणंसमुद्दिश्यचिक्षेपाशुहसन्निव सशरः प्रेषितस्तेनक्रोधदीप्तेनधन्विना सुशर्माणंसमासाद्यविभेदहृदयंरणे सगतासुर्महाराजपपातधरणीतले
नंदयन्पांडवान्सर्वान्व्यथयंश्चापितावकान् सुशर्माणंरणेहत्वापुत्रानस्यमहारथान् सप्तचाष्टौचत्रिंशच्चसायकैरनयत्क्षयं ततोस्यनिशितैर्बाणैः
सर्वान्हत्वापदानुगान् अभ्ययाद्भारतींसेनांहतशेषांमहारथः भीमस्तुसमरेक्रुद्धः पुत्रंतवजनाधिप सुदर्शनमदृश्यंतंशरैश्चक्रेहसन्निव ततोस्यप्रहस

रा०
८१

नकुलः शिरः कायात्सपाहरत् । कृपेणास्ततो द्रोणः नमहतः आयतद्भुवि तस्मिंस्तु निहते वीरे तेन तस्य पदानुगाः परिवव्रू रणे भीमं किरंतो विशिखान्छितान्
ततस्तु निशितैर्बाणैस्तमनीकं वृकोदरः इंद्राशनिसमस्पर्शैः समंतात्पर्यवाकिरत् ततः क्षणात्तुन्भीमोन्यहनद्भरतर्षभ तेषु तूत्साद्यमानेषु सेनाध्यक्षा
महाबलाः भीमसेनं समासाद्य ततो युध्यंत भारत तांस्तु सर्वान्शरैर्घोरैरवाकिरत पांडवः तथैव तावकं राजन्पांडवेयान्महारथान् । शरवर्षेण महता समंता
त्पर्यवारयन् व्याकुलं तदभूत्सर्वं पांडवानां परैः सह तावकानां च समरे पांडवेयैर्युयुत्सतां ततो योधास्तत्र पेतुः परस्परसमाहताः उभयोः सेनयो राजन्
संशोचयंतः स्म बांधवान् महाभारते शल्यपर्वणि [illegible]शमोध्यायः संजय उवाच तस्मिन्प्रवृत्ते संग्रामे नरवाजिगजक्षये शकुनिः सौबलो राजन्सहदेवं
समभ्ययात् ततोस्यापततस्तूर्णं सहदेवः प्रतापवान् शरौघान्प्रेषयामास पतंगानिव शीघ्रगान् उलूकश्च रणे भीमं विव्याध दशभिः शरैः शकुनिस्तु म
हाराज विव्याध च त्रिभिः शरैः सायकानां नवत्या वै सहदेवमवाकिरत् ते शूराः समरे राजन्समासाद्य परस्परं विव्यधुर्निशितैर्बाणैः कंकबर्हिणवाजितैः
स्वर्णपुंखैः शिलाधौतैराकर्णप्रहितैः शरैः चापश्चैर्विपरिधावद्भिः शरैश्छन्नैर्विशांपते आच्छादयद्दिशः सर्वा धाराभिरिव तोयदः ततः क्रुद्धो रणे भीमः
सहदेवश्च वीर्यवान्चेरतुः कदनं संख्ये कुर्वंतौ स्म महाबलौ ताभ्यां शरशतैश्छन्नं तद्बलं तव भारत अंधकारमिवाकाशमभवत्तत्र ह चापश्चैर्विपरिधा
वद्भिः शरैश्छन्नैर्विशांपते तत्र तत्र कृतो मार्गो विकर्षद्भिर्हतान्बहून् निहतानां हयानां च सहैव हयसादिभिः वर्मभिर्विनिकृत्तैश्च प्रासैश्छिन्नैश्च मारि
ष ऋष्टिभिः शक्तिभिस्तथैव समंततः संछन्ना पृथिवी जज्ञे कुसुमैः शबलाइव योधास्तत्र महाराज समासाद्य परस्परं व्यचरंत रणे क्रुद्धा विनिघ्नंतः
परस्परं उद्वृत्तनयनै रोषात्संदष्टोष्ठपुटैर्मुखैः सकुंडलैर्मही छन्ना पद्मकिंजल्कसप्रभैः भुजैश्छिन्नैर्महाराज नागराजकरोपमैः सांगदैः सत

नि ४५

ते ६

पंचदश... १७२ छि१

श०
४२

नुन्नैश्चसासिप्रासमपरश्वधैः कबंधैसं[illegible]तैश्छिन्नैर्नृत्यद्भिश्चापरैर्युधि क्रव्यादगणसंकीर्णो घोरोभूत्पृथिवीपते अल्पावशिष्टैस्तेषु कौरवेयान्महा
मृधे प्रहृष्टाः पांडवाभूत्वा निन्युर्यमसादनं एतस्मिन्नंतरे राजन्सौवलेयः प्रतापवान् प्रासेन सहदेवस्य शिरसि प्राहरद्भृशं सविह्वलो महाराज
रथोपस्थ उपाविशत् सहदेवं तथा दृष्ट्वा भीमसेनः प्रतापवान् सर्वसैन्यानि संक्रुद्धो वारयामास भारत निर्बिभेद च नाराचैः शत[illegible]शोथ सहस्रशः
विनिर्भिद्याकरोच्चैव सिंहनादमरिंदम तेन शब्देन वित्रस्ताः सर्वे सहयवारणाः प्राद्रवन्सहसा भीताः शकुनेश्च पदानुगाः प्रभग्नानथ तान्दृष्ट्वा राजा
दुर्योधनोब्रवीत् निवर्त्तध्वमधर्मज्ञा युध्यध्वं किं सृतेन वः इह कीर्त्तिं समाधाय प्रेत्य लोकान्समश्नुते प्राणान्जहाति यो वीरो युधि पृष्ठमदर्शय
न् एवमुक्तास्तु ते राज्ञा सौवलस्य पदानुगाः पांडवानभ्यवर्त्तंत मृत्युं कृत्वा निवर्त्तनं द्रवद्भिस्तत्र राजेंद्र कृतः शब्दोतिदारुणः क्षुब्धसागरसंका
शः क्षुभितः सर्वतोभवत् तांस्तथापततो दृष्ट्वा सौवलस्य पदानुगान् प्रत्युद्ययुर्महाराज पांडवा विजये स्थिताः प्रत्याश्वास्य च दुर्धर्षः सहदेवो वि
शांपते। शकुनिं दशभिर्विद्ध्वा हयांश्चास्य निशितैः शरैः धनुश्चिच्छेद च शरैः सौवलस्य हसन्निव अथान्यद्धनुरादाय शकुनिर्युद्धदुर्मदः विव्याध नकु
लं षष्ट्या भीमसेनं च सप्तभिः उलूकोपि महाराज भीमं विव्याध सप्तभिः सहदेवं च सप्तत्या परीप्सन्पितरं रणे तं भीमसेनः समरे विव्याध निशि
तैः शरैः शकुनिं च चतुःषष्ट्या पार्श्वस्थांश्च [illegible] त्रिभिस्त्रिभिः ते हन्यमाना भीमेन नाराचैस्तैलपायिभिः सहदेवं रणे क्रुद्धं छादयन्शरवृष्टिभिः
पर्वतं वारिधाराभिः सविद्युत इवांबुदः ततोस्यापततः शूरः सहदेवः प्रतापवान् उलूकस्य महाराज भल्लेनापाहरच्छिरः स जगाम रथाद्भूमिं
सहदेवेन पातितः रुधिराप्लुतसर्वांगो नंदयन्पांडवान्युधि पुत्रं तु निहतं दृष्ट्वा शकुनिस्तत्र भारत साश्रुकंठो विनिश्वसन्क्षत्तुर्वाक्यम

४२

श०
४२

नुस्मरन् चिंतयित्वा मुहूर्तं स वाष्पपूर्णेक्षणः श्वसन् सहदेवं समासाद्य त्रिभिर्विव्याध सायकैः तानपास्य शरांस्तूर्णं शरसंघैः प्रतापवान् स
हदेवो महाराज धनुश्चिच्छेद संयुगे । छिन्ने धनुषि राजेंद्र शकुनिः सौबलस्तदा प्रगृह्य विपुलं खड्गं सहदेवाय प्राहिणोत् तमापतंतं सहसा घो
ररूपं विशांपते द्विधा चिच्छेद समरे सौबलस्य हसन्निव असिं दृष्ट्वा द्विधा छिन्नं प्रगृह्य महतीं गदां प्राहिणोत्सहदेवाय सा मोघा न्यपतद्भुवि त
तः शक्तिं महाघोरां कालरात्रिमिवोद्यतां प्रेषयामास संक्रुद्धः पांडवं प्रति सौबलः तामापतंतीं सहसा शरैः कांचनभूषणैः त्रिधा चिच्छेद सम
रे सहदेवो हसन्निव सा पपात त्रिधा छिन्ना भूमौ कनकभूषणा शीर्यमाणा यथा दीप्ता गगनाद्वै शतह्रदा शक्तिं विनिहतां दृष्ट्वा सौबलं च भया
र्दितं दुद्रुवुस्तावकाः सर्वे भये जाते ससौबलाः अथोत्क्रुष्टं महद्ध्यासीत्पांडवैर्जितकाशिभिः धार्त्तराष्ट्रास्ततः सर्वे प्रायशो विमुखाभवन्
तान्वै विमनसो दृष्ट्वा माद्रीपुत्रः प्रतापवान् शरैरनेकसाहस्रैर्वारयामास संयुगे ततो गांधारकैर्गुप्तं पृष्ठैरश्वैर्जये धृतं आससाद रणे यांतं स
हदेवोऽथ सौबलं स्वमंशमवतिष्ठंतं संस्मरन् शकुनिं नृप रथेन कांचनांगेन सहदेवः प्रतापवान् अधिज्यं बलवत्कृत्वा व्याक्षिपत्सुमहद्धनुः
[illegible] स सौबलमभिद्रुत्य गार्द्धपत्रैः शिलाशितैः भृशमभ्यहनत्क्रुद्धस्तोत्रैरिव महाद्विपं उवाच चैनं मेधावी निगृ
ह्य स्मारयन्निव क्षत्रधर्मे स्थिरो भूत्वा युध्यस्व पुरुषो भव यत्तदा हृष्यसे मूढ ग्लहन्नक्षैः सभातले फलमद्य प्रपश्यस्व कर्मणस्तस्य दु
र्मते निहतास्ते दुरात्मानो ये स्मानवहसन्पुरा दुर्योधनः कुलांगारः शिष्टस्त्वं चास्य मातुलः अद्य ते निहनिष्यामि क्षुरेणोन्मथितं शिरः
वृक्षात्फलमिवोद्धृत्य लगुडेन प्रमाथिना एवमुक्त्वा महाराज सहदेवो विशांपते संक्रुद्धो नरशार्दूलो वेगेनाभिजगाम ह अभिगम्य तु दुर्द्धर्षः

सहदेवो युधांपतिः विक्षरन्कंख्यवल्लवच्चापं क्रोधेन प्रहसन्निव शकुनिं दशभिर्विद्ध्वा चतुर्भिश्चास्य वाजिनः छत्रं ध्वजं धनुश्चास्य छित्वा सिंह इवानद
त् छिन्नध्वजधनुश्छत्रः सहदेवेन सौबलः कृतो विद्धश्च बहुभिः सर्वमर्मसु सायकैः ततो भूयो महाराज सहदेवः प्रतापवान् शकुनिं प्रेषया
मास शरवृष्टिं दुरासदां ततस्तु क्रुद्धः सुबलस्य पुत्रो माद्रीसुतं सहदेवं विमर्दे प्रासेन जांबूनदभूषणेन जिघांसुरेकोभिययाव शीघ्रं माद्रीसुतस्त
स्य समुद्यतं तं प्रासं सुवृत्तौ च भुजौ रणाग्रे भल्लैस्त्रिभिर्युगपत्संचकर्त्त ननाद चोच्चैस्तरसाजिमध्ये तस्याशुकारी सुसमाहितेन स्वर्णपुंखेन दृढाय
सेन भल्लेन सर्वावरणातिगेन शिरः शरीरात्प्रममाथ भूयः शरेण कार्त्तस्वरभूषितेन दिवाकराभेन सुसंशितेन हृतोत्तमांगो युधि पांडवेन पपात
भूमौ सुबलस्य पुत्रः स तच्छिरो वेगवता शरेण सुवर्णपुंखेन शिलाशितेन प्रावेरयत्कुपितः पांडुपुत्रो यत्तत्कुरूणामनयस्य मूलं हृतोत्तमांगं शकु
निं समीक्ष्य भूमौ शयानं रुधिरार्द्रगात्रं योधास्त्वदीया भयनष्टसत्वा दिशः प्रजग्मुः प्रगृहीतशस्त्राः विप्रद्रुताः शुष्कमुखा विसंज्ञा गांडीवघोषेण
समाहताश्च भयार्दिता भग्नरथाश्वनागाः पदातयश्चैव सधार्त्तराष्ट्राः ततो रथाच्छकुनिं पातयित्वा मुदान्विता भारत पांडवेयाः शंखान्दध्मुः
समरे प्रहृष्टाः सकेशवाः सैनिकान्हर्षयंतः तं चापि सर्वे प्रतिपूजयंतो हृष्टा ब्रुवाणाः सहदेवमाजौ दिष्ट्या हतो नैकृतिको दुरात्मा सहात्मजो वी
र रणे त्वयेति॥ ॥इति महाभारते शल्यपर्वणि शकुन्युलूकवधः संजय उवाच ततः क्रुद्धा महाराज सौबलस्य पदानुगाः त्यक्त्वा जीवितमाक्रां
तः पांडवान्पर्यवारयन् तानर्जुनः प्रत्यगृह्णात् सहदेवजये धृतान् भीमसेनश्च तेजस्वी क्रुद्धाशीविषदर्शनः शक्त्यृष्टिप्रासहस्तानां सहदेवं जि
घांसतां संकल्पमकरोन्मोघं गांडीवेन धनंजयः संगृहीतायुधान्बाहून्योधानामभिधावतां भल्लैश्चिच्छेद बीभत्सुः शिरांस्यपि हयानपि ते हता

पत्रमपश्येन्नवस्थां विगतास्रवः त्वरितं लोकवीराणां प्रहृतः सव्यसाचिना ततो दुर्योधनो राजा दृष्ट्वा स्वबलसंक्षयं हतशेषान्समानीय क्रुद्धो ल
युगता विभो कुंजरं स्वहयांश्चैव पादातांश्च परंतप उवाच सहितान्सर्वान्धार्त्तराष्ट्र इदं वचः समासाद्य रणे सर्वान्पांडवान्ससुहृद्गणान् पांचा
लंचापि सबलं हत्वा शीघ्रं निवर्त्ततां तस्य ते शिरसा गृह्य वचनं युद्धदुर्मदाः प्रत्युद्ययू रणे पार्थांस्तव पुत्रस्य शासनात् तानभ्यापततः शीघ्रं हतशे
षान्महारणे शरैराशीविषाकारैः पांडवाः समवाकिरन् तत्सैन्यं भरतश्रेष्ठ मुहूर्तेन महात्मभिः अवध्यत रणं प्राप्य त्रातारं नाभ्यविंदत प्रतिष्ठ
मानं तु भयान्नावतिष्ठत दंशितं अश्वैर्विपरिधावद्भिः सैन्येन रजसा वृते न प्राज्ञायंत समरे दिशश्च प्रदिशस्तथा ततस्तु पांडवानीकान्निःसृत्य वह
वो जनाः अभ्यघ्नंस्तावकान्युद्धे मुहूर्तादिव भारत ततो निःशेषमभवत्तत्सैन्यं तव भारत अक्षौहिण्यः समेतास्तु तव पुत्रस्य भारत एकादश ह
ता युद्धे ताः प्रभो पांडुसृंजयैः तेषु राजसहस्रेषु तावकेषु महात्मसु एको दुर्योधनो राजन्नदृश्यत भृशं विक्षतः ततो वीक्ष्य दिशः सर्वा दृष्ट्वा शून्यां
च मेदिनीं विहीनः सर्वयोधैश्च पांडवान्वीक्ष्य संयुगे मुदितान्सर्वसिद्धार्थान्नर्दमानान्समंततः बाणशब्दरवांश्चैव श्रुत्वा तेषां महात्मनां दुर्यो
धनो महाराज कश्मलेनाभिसंवृतः अपयाने मनश्चक्रे विहीनबलवाहनः धृतराष्ट्र उवाच निहते मामके सैन्ये निःशेषे शिबिरे कृते पांडवानां ब
ले महति किं नु शेषमभूत्तदा एतन्मे पृच्छतो ब्रूहि कुशलो ह्यसि संजय यच्च दुर्योधनो मंदः कृतवांस्तनयो मम बलक्षयं ततो दृष्ट्वा स एकः पृथि
वीपतिः॥ ॥संजय उवाच रथानां द्वे सहस्रे तु सप्त नागशतानि च पंच चाश्वसहस्राणि पत्तीनां च शतं शताः एतच्छेषमभूद्राजन्पां
वानां महद्बलं परिगृह्य हि यद्युद्धे धृष्टद्युम्नो व्यवस्थितः एकाकी भरतश्रेष्ठ ततो दुर्योधनो नृपः नापश्यत्समरे कंचित्सहायं रथिनां वरः नर्दमा

नाग्यरांश्चैव सबलस्य च संक्षयं तथा हत्वा महाराज एकः स पृथिवीपतिः हते बले ह्यमुक्तस्य प्राङ्मुखः प्राद्रवत् एकादशचमूभर्ता पुत्रो दुर्योधन
स्तव गदामादाय तेजस्वी पदातिः प्रस्थितो ह्रदं नातिदूरं ततो गत्वा पद्भ्यामेव नराधिपः सस्मार वचनं क्षत्तुर्धर्मशीलस्य धीमतः इदं नूनं महाप्राज्ञो
विदुरो दृष्टवान् पुरा महद्वैशसमस्माकं क्षत्रियाणां च संयुगे। चिरं विचिन्तयानस्तु प्रविविक्षुर्ह्रदं नृपः दुःखसंतप्तहृदयो दृष्ट्वा राजन् बलक्षयं पा
ण्डवापि महाराज धृष्टद्युम्नपुरोगमाः अभ्यद्रवन्त संक्रुद्धास्तव राजन् बलं प्रति शक्त्यृष्टिप्रासहस्तानां बलानामभिगर्जतां संकल्पमकरोन्मोघं गा
ण्डीवेन धनंजयः तान् हत्वा निशितैर्बाणैः सामात्यान् सह बन्धुभिः रथे श्वेतहये राजन्नर्जुनो बह्वशोभत सुबलस्य हते पुत्रे सवाजिरथकुंजरे महा
वनमिव छिन्नमभवत्तावकं बलं अनेकशतसाहस्रे बले दुर्योधनस्य ह नान्यो महारथो राजन् जीवमानो व्यदृश्यत द्रोणपुत्रादृते वीरात्तथैव कृ
तवर्मणः कृपाच्च गौतमाद्राजन् पार्थिवाच्चैव तावकात् धृष्टद्युम्नस्तु मां दृष्ट्वा हसन् सात्यकिमब्रवीत् किमनेन गृहीतेन नानेनार्थोस्ति जीव
ता धृष्टद्युम्नवचः श्रुत्वा शिनेर्नप्ता महारथः उद्यम्य निशितं खड्गं हन्तुं मामुद्यतस्तदा तमागम्य महाप्राज्ञः कृष्णद्वैपायनोब्रवीत् मुच्यतां संजयो
जीवन्न हन्तव्यः कथंचन द्वैपायनवचः श्रुत्वा शिनेर्नप्ता कृताञ्जलिः ततो मामब्रवीन्मुक्त्वा स्वस्ति संजय साधय अनुज्ञातस्त्वहं तेन न्यस्तवर्मा नि
रायुधः प्रातिष्ठं येन नगरं सायाह्ने रुधिरोक्षितः क्रोशमात्रमपक्रान्तं गदापाणिमवस्थितं एकं दुर्योधनं राजन्नपश्यं भृशविक्षतं स तु मामश्रुपू
र्णाक्षो [illegible]नशक्नोत्समवीक्षितुं उपप्रैक्षत मां दृष्ट्वा तदा दीनमवस्थितं तं चाहमपि शोचन्तं दृष्ट्वैकाकिनमाहवे मुहूर्तं नाशकं वक्तुं किं
चिद्दुःखपरिप्लुतः ततोस्मै तदहं सर्वमुक्तवान् ग्रहणं तदा द्वैपायनप्रसादाच्च जीवतो मोक्षमाहवे मुहूर्तमिव च ध्यात्वा प्रतिलभ्य च चेतनां भ्रा

त्वंश्च सर्वसैन्यानि समपृच्छत मांततः तस्मैतदहमाचक्षंसर्वं [illegible] स्कृदर्शितान् भ्रातॄंश्चनिहतान्सर्वान्सैन्यंच विनिपातितं त्रयः किलरथाः
शिष्टास्तावकानांनराधिप इतिप्रस्थानकालेमांकृष्णद्वैपायनोब्रवीत् सदीर्घमिव निश्वस्यविप्रेक्ष्यचपुनः पुनः अंसेमांपाणिनास्पृष्ट्वापुत्रस्तेप
र्यभाषत त्वदन्योनेहसंग्रामेकश्चिज्जीवतिसंजय द्वितीयंनेहपश्यामिससहायाश्चपांडवाः ब्रूयाः संजयराजानंप्रज्ञाचक्षुषमीश्वरं दुर्योधनस्तवसु
तः प्रविष्टोह्रदमित्युत सुहृद्भिस्तादृशैर्हीनः पुत्रैर्भ्रातृभिरेवच पांडवैश्चहृतेराज्येकोनुजीवेतमादृशः आचक्षीथाः सर्वमिदंमांचमुक्तंमहाहवे
अस्मिंस्तोयह्रदेसंजीवंतंभृशविक्षतं एवमुक्त्वामहाराजप्राविशत्तंह्रदंनृपः अस्तंभयततोयंचमाययामनुजाधिपः तस्मिन्ह्रदेप्रविष्टेतुत्री

स्थान

न्श्रांतवाहनान् अपश्यंसहितानेकस्तंदेशंसमुपेयुषः कृपंशारद्वतंवीरंद्रौणिंचरथिनांवरं भोजंचकृतवर्माणंसहितान्शरविक्षतान्तेसर्वेमाम
भिप्रेक्ष्यतूर्णमश्वानचोदयन् उपायायचमामूचुर्दिष्ट्याजीवसिसंजय अपृच्छंश्चैवतेसर्वेपुत्रंतवजनाधिप कच्चिद्दुर्योधनोराजासनोजीवतिसंजय
आख्यातवानहंतेभ्यस्तदाकुशलिनंनृपं तच्चैवसर्वमाचक्षंयन्मांदुर्योधनोब्रवीत् ह्रदंचैवाहमाचक्षंयंप्रविष्टोनराधिपः अश्वत्थामातुतद्राजन्निश
म्यवचनंमम तंह्रदंविपुलंप्रेक्ष्यकरुणंपर्यदेवयत् अहोधिङ्नसजानातिजीवतोस्मान्नराधिपः पर्याप्ताहिवयंतेनसहयोधयितुंपरान् तेतुतत्रचि
रंकालंविलप्यचमहारथाः प्राद्रवन्रथिनांश्रेष्ठादृष्ट्वापांडुसुतान्रणे तेनमांरथमारोप्यकृपस्यसुपरिष्कृतं सेनानिवेशमाजग्मुर्हतशेषास्त्रयो
रथाः तत्रगुल्माः परित्रस्ताः सूर्येचास्तमितेसति सर्वेविचुक्रुशुः श्रुत्वापुत्राणांतवसंक्षयं ततोवृद्धामहाराजयोषितांरक्षिणोनराः राजदारा
नुपादायप्रययुर्नगरंप्रति तत्रविक्रोशतीनांचरुदतीनांचसर्वशः प्रादुरासीन्महान्शब्दः श्रुत्वातद्बलसंक्षयं ततस्तायोषितोराजन्क्रंदंत्योवैमु

स०

५५

रुर्मुहुः कुरर्यइवशब्देननादयंत्योमहीतलं आजघ्नुः करजैश्चापिपाणिभिश्चशिरांस्युत लुलुचुश्चतदाकेशान्क्रोशंत्यस्तत्रतत्रह हाहाकारविना
दिनोविनिघ्नानाउरांसिच क्रोशंत्यस्तत्ररुरुदुःक्रंदमानाविशांपते ततोदुर्योधनामात्याःसाश्रुकंठप्रशान्तराः राजदारानुयात्राश्चप्रययुर्नगरंप्रति वे
त्रयासक्तहस्ताश्चद्वाराध्यक्षाविशांपते शयनीयानिशुभ्राणिस्पर्ध्यास्तरणवंतिच समादायययुस्तूर्णंनगरंजनरक्षिणः आस्थायाश्वतरीयुक्ता
न्स्यंदनेनापरेजनाः स्वान्स्वान्दारानुपादायप्रययुर्नगरंप्रति अदृष्टपूर्वायानार्योभास्करेणापिवेश्मसु ददृशुस्तामहाराजजनायांतीःपुरंप्र
ति ताःस्त्रियोभरतश्रेष्ठसौकुमार्यसमन्विताः प्रययुर्नगरंतूर्णंहतस्वजनबांधवाः आगोपालाविपालेभ्योद्रवंतोनगरंप्रति ययुर्मनुष्याःसं
भ्रांताभीमसेनभयार्दिताः अपिचैषांभयंतीव्रंपार्थेभ्योभूत्तदादारुणं प्रेक्ष्यमाणास्तदान्योन्यमधावन्नगरंप्रति तस्मिंस्तथावर्तमानेविद्रवेभृश
दारुणे युयुत्सुःशोकसंमूढःप्राप्तकालमचिंतयत जितोदुर्योधनःसंख्येपांडवैर्भीमविक्रमैः एकादशचमूभर्त्ताभ्रातरश्चास्यसूदिताः हता
श्चकुरवःसर्वेभीष्मद्रोणपुरस्सराः अहमेकोविमुक्तस्तुभाग्ययोगाद्यदृच्छया विद्रुतानिचसर्वाणिशिबिराणिसमंततः इतस्ततःपलायंतेहत
नाथाहतौजसः अदृष्टपूर्वादुःखार्त्ताभयव्याकुललोचनाः हरिणाइववित्रस्ताःप्रेक्ष्यमाणादिशोदश दुर्योधनस्यसचिवायेकेचिदवशेषिता
: राजदारानुपादायप्रययुर्नगरंप्रति प्राप्तकालमहंमन्येप्रवेशंतैःसहप्रभो युधिष्ठिरमनुज्ञाप्यभीमसेनंतथैवच एतमर्थंमहाबाहुरुभयोः
सन्यवेदयत तस्यप्रीतोभवद्राजानित्यंकरुणवेदितापरिष्वज्यमहाबाहुर्वैश्यापुत्रंव्यसर्जयत ततःसरथमास्थायद्रुतमश्वानचोदयत संवाहयि
तवांश्चापिराजदारान्पुरंप्रतितैश्चैवसंसहितैःक्षिप्रमस्तंगच्छतिभास्करे प्रविष्टोहास्तिनपुरंबाष्पकंठोश्रुलोचनः अपश्यतमहाप्राज्ञंविदुरंसाश्रुलो

ए.म०

५५

श०
५६

चनं राज्ञः समीपान्निष्क्रांतं शोकोपहतचेतसं तमब्रवीत्ससधृतिः प्रणतं त्वग्रतः स्थितं अस्मिन्कुरुक्षये वृत्ते दिष्ट्या त्वं पुत्र जीवसि विनाशतः
प्रवेशाद्वै किमसि त्वमिहागतः एतन्मे कारणं सर्वं विस्तरेणान्निवेदय युयुत्सुरुवाच निहते शकुनौ तात सज्ञातिसुतबांधवे हतशेषपरीवारो रा
जा दुर्योधनस्ततः स्वकं सहायमुत्सृज्य प्राङ्मुखः प्राद्रवन्भयात् अपक्रांते तु नृपतौ स्कंधावारनिवेशनात् भयव्याकुलितं सर्वं प्राद्रवन्नगरं
ति ततो राज्ञः कलत्राणि भ्रातृणां चास्य सर्वतः वाहनेषु समारोप्य स्त्र्यध्यक्षाः प्राद्रवन्भयात् ततोहं समनुज्ञाप्य राजानं सहकेशवं प्रविष्टो हास्ति
नपुरं रक्षन्लोकानप्रधावितान् एतच्छ्रुत्वा तु वचनं वैश्यापुत्रेण भाषितं प्राप्तकालमिति ज्ञात्वा विदुरः सर्वधर्मवित् अपूजयदमेयात्मा युयुत्सुं वा
क्यकोविदं प्राप्तकालमिदं सर्वं ब्रुवतो भरतक्षयं संस्मृतः कुलधर्मश्च सानुक्रोशतया त्वया दिष्ट्या त्वां तात संग्रामादस्माद्वीरक्षयात्परं समागत
मपश्याम त्वं शुमंतमिव प्रजाः अंधस्य नृपतेर्यष्टिर्लुब्धस्यादीर्घदर्शिनः बहुशो याच्यमानस्य दैवोपहतचेतसः त्वमेको विवशस्तस्य ध्रियसे पुत्र सर्वशः
अद्य त्वमिह विश्रांतः श्वोगंतासि युधिष्ठिरं एतावदुक्त्वा वचनं विदुरः सर्वधर्मवित् युयुत्सुं समनुज्ञाप्य प्रविवेश नृपक्षयं पौरजानपदैर्दुःखाद्धा
हेति भृशनादितं निरानंदं गतश्रीकं हतनाथं नृपाशयं अस्वरूपमयध्वस्तं दृष्ट्वा दुःखतरोभवत् विदुरः सर्वधर्मज्ञो विक्लवेनांतरात्मना विवेश
नृपते राजन्निःश्वासन्नैः शनैः युयुत्सुरपि तां रात्रिं स्वगृहेन्यवसत्तदा वंद्यमानः स्वकैश्चापि नाभ्यनंदत्सुदुःखितः चिंतयानः क्षयं तीव्रं भरतानां प
रस्परं॥ ॥इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां शल्यपर्व समाप्तं॥ ॥शुभमस्तु॥ ॥श्रीकृष्णाय गोविंदाय नमो नमः

शे ५

श०
५६

श्री २

ॐ

[illegible]

[illegible]

[illegible]

[illegible]